सरल-संस्कृत-प्रवेशिका

(व्याकरण-संक्षेप-सहित)

लेखक

पं० धृतराम शास्त्री

प्रधानाध्यापक, गवर्नमेंट हाई स्कूल,

जालन्धर ।

प्रकाशक

मेहरचन्द्र लक्ष्मणदास

कूचा चेलाँ, दरियागंज,

दिल्ली ।

वि० सं० २००८] द्वितीय संस्करण [सन १९५१

भूमिका

संस्कृत भाषा के महत्त्व से समग्र संसार परिचित है। यह संसार की प्राचीनतम भाषाओं में से है। इसके साहित्य में ऐसे-ऐसे तत्त्व-रत्नों का समावेश है कि विदेशी विद्वान् इसके गुणों से मुग्ध होकर इसकी मुक्तकण्ठ से प्रशंसा करते हैं। भारत-वासियों का दुर्भाग्य है कि वे संस्कृत को मृतभाषा कहकर अपने पाओं पर आप ही कुठाराघात कर रहे हैं।

संस्कृत भाषा का ज्ञान प्रत्येक मानव के लिए अत्यावश्यक है। यह सभी भाषाओं की जननी है। हमारे ज्ञान के भण्डार वेद, उपनिषद्, पुराण तथा काव्य आदि इसी भाषा में हैं। इसका अध्ययन हमारे उत्थान के लिए परमावश्यक है। यह अनुभव करके ही मैंने इस पुस्तक में भिन्न २ विषयों का संग्रह किया है।

इसमें मैंने संस्कृत भाषा का परिचय देने का प्रयत्न किया है जिससे प्रारम्भिक शिक्षा में सहायता मिले। इस बात का विशेष ध्यान रखा गया है कि पुस्तक को रोचक तथा सरल बनाया जाय। पाठक जानते हैं कि संस्कृत और भारतीय संस्कृति दोनों पर्य्यायवाची शब्द हैं। भारतीय संस्कृति के आधार हमारे वाल्मीकि, व्यास तथा अन्य दार्शनिक और साहित्यिक लोग हैं। परं वाल्मीकि और व्यास के बिना भारतीय संस्कृति और साहित्य की सत्ता ही नहीं समझी जाती। इसलिए इस पुस्तक का आरम्भ आदि कवि वाल्मीकि के रामायणसार, महाभारत के रचयिता व्यास के गीतोपदेशसार तथा श्रीकृष्ण-चरित और ध्रुव की जीवनी से किया गया है। सरसता के लिए विविध गाथाएँ तथा उपयोगी लेख भी दिये गये हैं। संस्कृत साहित्य की अमूल्य निधि शकुन्तला नाटक के चतुर्थाङ्क के

शकुन्तला की विदाई पर कण्व के उपदेश का सार तथा शिक्षितोपयोगी हितोपदेश की प्रस्तावना तथा मित्रलाभ का सार भी दिया गया है । संस्कृत की कविता का रसास्वादन कराने के लिए विविध विषयों के पद्य भी संगृहीत किये गये हैं। अन्त में शब्दार्थकोश तथा परिशिष्ट जोड़ा गया है जिसमें संस्कृत भाषा समझने के लिए उपयुक्त व्याकरण का अंश दिया गया है । यथाशक्ति यह ध्यान रखा गया है कि इस व्याकरण में उदाहरण वे ही प्रायः दिये जाएँ, जो इस पुस्तक में आये हों, जिससे पुस्तक समझने में छात्रों को सुभीता रहे । प्रायः यह कहने में आता है कि संस्कृत एक क्लिष्ट भाषा है, इसकी शिक्षण-पद्धति सुगम नहीं । इस दोष को दूर करने के लिए कहीं-कहीं उदाहरणों द्वारा लक्षण रूप नवीन पद्धति का आश्रयण करते हुए व्याकरण-विषयों को सुगम बनाया गया है। साथ-साथ अभ्यास भी दिये गये हैं।

मेरा विश्वास है कि संस्कृत में प्रवेश करने के लिए यह पुस्तक छात्रों के लिए अत्युपयोगी प्रमाणित होगी। आशा है कि संस्कृत प्रेमी इससे पूर्ण लाभ उठाने का यत्न करेंगे।

—लेखक

शुद्धि-अशुद्धि-पत्रम्

पृष्ठ मूलपाठ-पंक्ति	अशुद्धयः	संशोधनम्
१३९ दा के लङ् के उत्तम पु० एक वचन के रूप में	अददाम	अददाम्
१४० शक् धातुके विधिलिङ् के उत्तम पु० के एकवचन में	शक्नुयाम	शक्नुयाम्
१४० १७	शक्नुव	शक्नुवः
१४१ ५	अशक्नुवम्	अशक्नवम्
१५३ १७	इकट्ठा	इकट्ठ

विषय-सूचिका

रामायण-सार:

(१)

रामायण-संक्षेप:

आदौ रामतपोवनाधिगमनं, मायामृगोन्माथनम् ।
वैदेहीहरणं, जटायुमरणं, सुग्रीवसम्भाषणम् ॥
वालिप्रोन्मथनम्, समुद्रतरणं, लङ्कापुरीदाहनम् ।
पश्चाद्रावणकुम्भकर्णहननं चैतद्धि रामायणम् ॥

रामचरितानुकीर्तनम् ।

ॐ, तपःस्वाध्यायनिरतं, तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ, वाल्मीकिर्मुनिपुङ्गवम् ॥१॥
को न्वस्मिन् साम्प्रतं लोके, गुणवान् कश्च वीर्य्यवान् ।
धर्म्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥२॥
चारित्रेण च को युक्तः सर्वभूतेषु को हितः ।
विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः ॥३॥
आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः ।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ॥४॥
एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ।
महर्षे ! त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम् ॥५॥

श्रुत्वा चैतत्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः ।
श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्यमब्रवीत् ॥६॥
बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः ।
मुने ! वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः ॥७॥
इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ।
नियतात्मा महावीर्य्यो द्युतिमान् धृतिमान्वशी ॥८॥
बुद्धिमान्नीतिमान् वाग्मी श्रीमाञ्छत्रुनिबर्हणः ।
विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ॥९॥
महोरस्को महेष्वासो गूढजत्रुररिन्दमः ।
आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ॥१०॥
समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ।
पीनवक्षा विशालाक्षो लक्ष्मीवाञ्छुभलक्षणः ॥११॥
धर्म्मज्ञः सत्यसन्धश्च प्रजानाञ्च हिते रतः ।
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ॥१२॥
प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः ।
रक्षिता जीवलोकस्य धर्म्मस्य परिरक्षिता ॥१३॥
रक्षिता स्वस्य धर्म्मस्य स्वजनस्य च रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥१४॥
सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ॥१५॥

सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ।
आर्य्यः सर्वसमश्चैव सदैव प्रियदर्शनः ॥१६॥
स च सर्वगुणोपेतः कौशल्यानन्दवर्धनः ।
समुद्र इव गाम्भीर्य्ये धैर्य्येण हिमवानिव ॥१७॥
विष्णुना सदृशो वीर्य्ये सोमवत्प्रियदर्शनः ।
कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः ॥१८॥
धनदेन समस्त्यागे सत्ये धर्म्म इवापरः ।

अभ्यासः

१. अधोनिर्दिष्ट में सन्धिच्छेद करो—
को न्वस्मिन् । समर्थश्च । वाक्यमब्रवीत् । समुद्र इव । समस्त्यागे । वक्ष्याम्यहम् ।

२. समस्तपदों का विग्रह लिखकर समासों का नाम तथा अर्थ लिखो—
वेद-वेदाङ्ग-तत्त्वज्ञः । कम्बुग्रीवः । अनसूयकः । प्रिय-दर्शनः । सर्वगुणोपेतः ।

३. पद-परिचय दो—
श्रूयताम् । बुद्ध्वा । श्रोतुम् । हत्वा । आमन्त्र्य ।

४. वाल्मीकि ने नारद से क्या प्रश्न किया था ? नारद के उत्तर का सार अपने शब्दों में संक्षेप से लिखिए ।

---

(२)

रामवनगमनम्, चित्रकूटवासः, दण्डकारण्यवासः ।

तमेवं गुणसम्पन्नं रामं सत्यपराक्रमम् ॥१९॥
ज्येष्ठं ज्येष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् ।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया ॥२०॥
यौवराज्येन संयोक्तुमैच्छत्प्रीत्या महीपतिः ।
तस्याभिषेकसम्भारान्दृष्ट्वा भार्य्याथ कैकयी ॥२१॥
पूर्वं दत्तवरा देवी वरमेनमयाचत ।
विवासनं च रामस्य भरतस्याभिषेचनम् ॥२२॥
स सत्यवचनाद्राजा धर्म्मपाशेन संयतः ।
विवासयामास सुतं रामं दशरथः प्रियम् ॥२३॥
स जगाम वनं वीरः प्रतिज्ञामनुपालयन् ।
पितुर्वचननिर्देशात् कैकय्याः प्रियकारणात् ॥२४॥
तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह ।
स्नेहाद् विनयसम्पन्नः सुमित्रानन्दवर्धनः ॥२५॥
भ्रातरं दयितो भ्रातुः सौभ्रात्रमनुदर्शयन् ।
रामस्य दयिता भार्य्या नित्यं प्राणसमा हिता ॥२६॥
जनकस्य कुले जाता देवमायेव निर्म्मिता ।
सर्वलक्षणसम्पन्ना नारीणामुत्तमा वधूः ॥२७॥

सीताप्यनुगता रामं शशिनं रोहिणी यथा ।
पौरैरनुगतो दूरं पित्रा दशरथेन च ॥२८॥
शृङ्गवेरपुरे सूतं गङ्गाकूले व्यसर्जयत् ।
गुहमासाद्य धर्म्मात्मा निषादाधिपतिं प्रियम् ॥२९॥
गुहेन सहितो रामो लक्ष्मणेन च सीतया ।
ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ॥३०॥
चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् ।
रम्यमावसथं कृत्वा रममाणा वने त्रयः ॥३१॥
देवगन्धर्वसंकाशास्तत्र ते न्यवसन् सुखम् ।
चित्रकूटं गते रामे पुत्रशोकातुरस्तदा ॥३२॥
राजा दशरथः स्वर्गं जगाम विलपन्सुतम् ।
गते तु तस्मिन्भरतो वसिष्ठप्रमुखैर्द्विजैः ॥३३॥
नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः ।
स जगाम वनं वीरो रामपादप्रसादकः ॥३४॥
गत्वा तु स महात्मानं रामं सत्यपराक्रमम् ।
अयाचद् भ्रातरं राममार्यभावपुरस्कृतः ॥३५॥
त्वमेव राजा धर्म्मज्ञ इति रामं वचोऽब्रवीत् ।
रामोऽपि परमोदारः सुमुखः सुमहायशाः ॥३६॥
न चैच्छत्पितुरादेशाद्राज्यं रामो महाबलः ।
पादुके चास्य राज्याय न्यासं दत्त्वा पुनः पुनः ॥३७॥

निवर्तयामास ततो भरतं भरताग्रजः ।
स काममनवाप्यैव रामपादावुपस्पृशन् ॥३८॥
नन्दिग्रामेऽकरोद् राज्यं रामागमनकाङ्क्षया ।
गते तु भरते श्रीमान् सत्यसन्धो जितेन्द्रियः ॥३९॥
रामस्तु पुनरालक्ष्य नागरस्य जनस्य च ।
तत्रागमनमेकाग्रो दण्डकान् प्रविवेश ह ॥४०॥
प्रविश्य तु महारण्यं रामो राजीवलोचनः ।
विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ॥४१॥
सुतीक्ष्णं चाप्यगस्त्यश्च अगस्त्यभ्रातरं तथा ।
अगस्त्यवचनाच्चैव जग्राहैन्द्रं शरासनम् ॥४२॥
खड्गं च परमप्रीतस्तूणी चाक्षयसायकौ ।

अभ्यासः

१. लिङ्ग, विभक्ति, वचन लिखकर अर्थ भी लिखो—
प्रीत्या । प्रतिज्ञाम् । नारीणाम् । सीतया । भ्रातरम् ।

२. सन्धिच्छेद करो—
सीताप्यनुगता । नदीस्तीर्त्वा । त्वमेव । रामस्तु । पुनरालक्ष्य ।

३. समस्तपदों के विग्रह दो, समासों के नाम तथा उनके अर्थ भी लिखो—
सत्यपराक्रमम् । पुत्रशोकातुरः । महाबलः । आर्य्यभावपुरस्कृतः । सुमुखः । जितेन्द्रियः । राजीवलोचनः ।

४. पद-परिचय दो—
संयोक्तुम्। अनुपालयन्। गत्वा। हत्वा। दत्त्वा। प्रविश्य। अनवाप्य।

५. भरत ने राज्य प्राप्त करके भी क्यों स्वीकार नहीं किया ?

६. प्रार्थना करने पर भी राम के वन से न लौटने पर भरत ने १४ वर्ष का समय कैसे व्यतीत किया ?

---

(३)

सीताहरणम्, सुग्रीवसम्भाषणम्, वालिवधः, सुग्रीवाभिषेकः ।

वसतस्तस्य रामस्य वने वनचरैः सह ॥४३॥
ऋषयोऽभ्यागमन् सर्वे वधायासुररक्षसाम् ।
स तेषां प्रतिशुश्राव राक्षसानां तदा वने ॥४४॥
प्रतिज्ञातश्च रामेण वधः संयति रक्षसाम् ।
ऋषीणामग्निकल्पानां दण्डकारण्यवासिनाम् ॥४५॥
तेन तत्रैव वसता जनस्थाननिवासिनी ।
विरूपिता शूर्पणखा राक्षसी कामरूपिणी ॥४६॥
ततः शूर्पणखावाक्यादुद्युक्तान्सर्वराक्षसान् ।
खरं त्रिशिरसं चैव दूषणं चैव राक्षसम् ॥४७॥

निजघान रणे रामस्तेषां चैव पदानुगान् ।
वने तस्मिन्निवसता जनस्थान-निवासिनाम् ॥४८॥
रक्षसां निहतान्यासन् सहस्राणि चतुर्दश ।
ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्च्छितः ॥४९॥
सहायं वरयामास मारीचं नाम राक्षसम् ।
वार्य्यमाणः सुबहुशो मारीचेन स रावणः ॥५०॥
न विरोधो बलवता क्षमो रावण ! तेन ते ।
अनादृत्य तु तद्वाक्यं रावणः कालचोदितः ॥५१॥
जगाम सहमारीचस्तस्याश्रमपदं तदा ।
तेन मायाविना दूरमपवाह्य नृपात्मजौ ॥५२॥
जहार भार्य्यां रामस्य गृध्रं हत्वा जटायुषम् ।
गृध्रञ्च निहतं दृष्ट्वा हृतां श्रुत्वा च मैथिलीम् ॥५३॥
राघवः शोकसन्तप्तो विललापाकुलेन्द्रियः ।
ततस्तेनैव शोकेन गृध्रं दग्ध्वा जटायुषम् ॥५४॥
मार्गमाणो वने सीतां राक्षसं स ददर्श ह ।
कबन्धं नाम रूपेण विकृतं घोरदर्शनम् ॥५५॥
तं निहत्य महाबाहुर्ददाह स्वर्गतश्च सः ।
स चास्य कथयामास शबरीं धर्म्मचारिणीम् ॥५६॥
श्रमणां धर्म्मनिपुणामभिगच्छेति राघव ।
सोऽभ्यगच्छन्महातेजाः शबरीं शत्रुसूदनः ॥५७॥

शबर्य्या पूजितः सम्यग्रामो दशरथात्मजः ।
पम्पातीरे हनुमता सङ्गतो वानरेण ह ॥५८॥
हनुमद्वचनाच्चैव सुग्रीवेण समागतः ।
सुग्रीवाय च तत्सर्वं शंसद्रामो महाबलः ॥५९॥
आदितस्तद् यथावृत्तं सीतायाश्च विशेषतः ।
सुग्रीवश्चापि तत्सर्वं श्रुत्वा रामस्य वानरः ॥६०॥
चकार सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम् ।
ततो वानरराजेन वैरानुकथनं प्रति ॥६१॥
रामायावेदितं सर्वं प्रणयाद् दुःखितेन च ।
प्रतिज्ञातं च रामेण तदा बालिवधं प्रति ॥६२॥
बालिनश्च बलं तत्र कथयामास वानरः ।
सुग्रीवः शङ्कितश्चासीन्नित्यं वीर्य्येण राघवे ॥६३॥
राघव-प्रत्ययार्थं तु दुन्दुभेः कायमुत्तमम् ।
दर्शयामास सुग्रीवो महापर्वतसन्निभम् ॥६४॥
उत्स्मयित्वा महाबाहुः प्रेक्ष्य चास्थि महाबलः ।
पादाङ्गुष्ठेन चिक्षेप सम्पूर्णं दशयोजनम् ॥६५॥
बिभेद च पुनस्तालान् सप्तैकेन महेषुणा ।
गिरिं रसातलं चैव जनयन् प्रत्ययं तदा ॥६६॥
ततः प्रीतमनास्तेन विश्वस्तः स महाकपिः ।
किष्किन्धां रामसहितो जगाम च गुहां तदा ॥६७॥

ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिङ्गलः ।
तेन नादेन महता निर्जगाम हरीश्वरः ॥६८॥
अनुमान्य तदा तारां सुग्रीवेण समागतः ।
निजघान च तत्रैनं शरेणैकेन राघवः ॥६९॥
ततः सुग्रीववचनाद्धत्वा वालिनमाहवे ।
सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत् ॥७०॥

अभ्यासः

१. काल, पुरुष, वचन लिखकर अर्थ भी लिखो—
अभिगच्छ । आसीत् । अगर्जत् । प्रत्यपादयत् ।

२. लिङ्ग, विभक्ति, वचन लिखकर अर्थ लिखो—
वसतः । संयति । त्रिशिरसं । रक्षसाम् । वालिनम् ।

३. सन्धिच्छेद करो—
वसतस्तस्य । ततस्तेनैव । सीतायाश्च । तद्राज्ये । शरेणैकेन ।

४. समस्तपदों का विग्रह लिखकर, समासों के नाम दो, तथा उनके अर्थ लिखो—
जनस्थाननिवासिनी । शोकसन्तप्तः । आकुलेन्द्रियः । हेमपिङ्गलः । हरीश्वरः ।

५. रावण ने किसकी सहायता से सीता का हरण किया ?

६. सुग्रीव से राम की मित्रता का संक्षिप्त वर्णन करो ।

(४)

सीतान्वेषणम्, समुद्रतरणम्, रामस्य लङ्काक्रमणम्, रावणवधः, विभीषणाभिषेकः ।

स च सर्वान्समानीय वानरान् वानरर्षभः ।
दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजाम् ॥७१॥
ततो गृध्रस्य वचनात् सम्पातेर्हनुमान् बली ।
शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवम् ॥७२॥
तत्र लङ्कां समासाद्य पुरीं रावणपालिताम् ।
ददर्श सीतां ध्यायन्तीमशोकवनिकागताम् ॥७३॥
निवेदयित्वाभिज्ञानं प्रवृत्तिं विनिवेद्य च ।
समाश्वास्य च वैदेहीं मर्दयामास तोरणम् ॥७४॥
पञ्च सेनाग्रगान् हत्वा सप्त मन्त्रिसुतानपि ।
शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत् ॥७५॥
अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरात् ।
मर्षयन् राक्षसान् वीरो यन्त्रिणस्तान् यदृच्छया ॥७६॥
ततो दग्ध्वा पुरीं लङ्कामृते सीतां च मैथिलीम् ।
रामाय प्रियमाख्यातुं पुनरायान्महाकपिः ॥७७॥
सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम् ।
न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः ॥७८॥

ततः सुग्रीवसहितो गत्वा तीरं महोदधेः ।
समुद्रं क्षोभयामास शरैरादित्यसन्निभैः ॥७९॥
दर्शयामास चात्मानं समुद्रः सरितां पतिः ।
समुद्रवचनाच्चैव नलं सेतुमकारयत् ॥८०॥
तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे ।
रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ॥८१॥
तामुवाच ततो रामः परुषं जनसंसदि ।
अमृष्यमाणा सा सीता विवेश ज्वलनं सती ॥८२॥
ततोऽग्निवचनात् सीतां ज्ञात्वा विगतकल्मषाम् ।
कर्म्मणा तेन महता त्रैलोक्यं सचराचरम् ॥८३॥
सदेवर्षिगणं तुष्टं राघवस्य महात्मनः ।
बभौ रामः सम्प्रहृष्टः पूजितः सर्वदैवतैः ॥८४॥
अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम् ।
कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥८५॥

अभ्यासः

१. सन्धिच्छेद करो—
प्रियमाख्यातुम् । समुद्रवचनाच्चैव । कृतकृत्यस्तदा ।
सीतामनुप्राप्य । राक्षसेन्द्रम् ।
२. लिङ्ग, विभक्ति, वचन लिखकर अर्थ भी लिखो—
दिशः । सम्पातेः । प्रवृत्तिं । कर्म्मणा । लङ्कायाम् ।
३. समस्तपदों का विग्रह लिखकर, समासों के नाम तथा

उनके अर्थ लिखो—
रावणपालिताम् । जनसंसदि । विगतकल्मषाम् । विज्वरः । कृतकृत्यः ।

४. श्रीराम ने कैसे समुद्र को तैरा ? किनकी सहायता से समुद्र पर पुल का निर्माण किया गया ?

(५)

अयोध्याप्रस्थानम्, रामाभिषेकः, रामराज्यम् ।

देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान् ।
अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद्वृतः ॥८६॥
भरद्वाजाश्रमं गत्वा रामः सत्यपराक्रमः ।
भरतस्यान्तिके रामो हनूमन्तं व्यसर्जयत् ॥८७॥
पुनराख्यायिकां जल्पन्सुग्रीवसहितस्तदा ।
पुष्पकं तत्समारुह्य नन्दिग्रामं ययौ तदा ॥८८॥
नन्दिग्रामे जटां हित्वा भ्रातृभिः सहितोऽनघः ।
रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान् ॥८९॥
प्रहृष्टमुदितो लोकस्तुष्टः पुष्टः सुधार्मिकः ।
निरामयो ह्यरोगश्च दुर्भिक्षभयवर्जितः ॥९०॥
न पुत्रमरणं केचिद् द्रक्ष्यन्ति पुरुषाः क्वचित् ।
नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः ॥९१॥

न चाग्निजं भयं किञ्चिन्नाप्सु मज्जन्ति जन्तवः ।
न वातजं भयं किञ्चिन्नापि ज्वरकृतन्तथा ॥९२॥
न चापि क्षुद्भयं तत्र न तस्करभयन्तथा ।
नगराणि च राष्ट्राणि धनधान्ययुतानि च ॥९३॥
नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा ।
अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ॥९४॥
गवां कोट्ययुतं दत्त्वा विद्वद्भ्यो विधिपूर्वकम् ।
असंख्येयं धनं दत्त्वा ब्राह्मणेभ्यो महायशाः ॥९५॥
राजवंशाञ्छतगुणान् स्थापयिष्यति राघवः ।
चातुर्वर्ण्यञ्च लोकेऽस्मिन्स्वे स्वे धर्म्मे नियोक्ष्यति ॥९६॥
दशवर्षसहस्राणि दशवर्षशतानि च ।
रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति ॥९७॥
इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितम् ।
यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते ॥९८॥
एतदाख्यानमायुष्यं पठन् रामायणं नरः ।
सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ॥९९॥
पठन् द्विजो वागृषभत्वमीयात्,
स्यात्क्षत्रियो भूमिपतित्वमीयात् ।
वणिग्जनः पण्यफलत्वमीया-
ज्जनश्च शूद्रोऽपि महत्त्वमीयात् ॥१००॥

अभ्यासः

१. लिङ्ग, विभक्ति, वचन लिखकर अर्थ भी लिखो—
देवताभ्यः । हनूमन्तं । भ्रातृभिः । विद्वद्भ्यः । अस्मिन् ।
२. पद-परिचय दो—
प्राप्य । प्रेत्य । ईयात् । प्रमुच्यते । महीयते ।
३. समस्तपदों का विग्रह लिखकर समासों का नाम तथा उनका अर्थ लिखो—
ज्वरकृतम् । रामचरितम् । सगणः । अनघः । महायशाः ।
४. रामराज्य की महत्ता का अपने वाक्यों में वर्णन करो ।
५. वाल्मीकि द्वारा वर्णित रामायण के लाभों का वर्णन करो ।

श्रीकृष्णः

परःपञ्चसहस्राणां शरदां कथा । मथुरायाम् उग्रसेन-सुतः कंसो नाम नृशंसो राजासीत् । देवकीति तस्य भगिनी ।

कदाचित् कथाप्रसङ्गेन तेन नारदस्य मुखाच्छ्रुतं, यद्देवक्याः काचित् सन्ततिस्त्वां हनिष्यति । ततः स आत्म-रक्षायै देवकीं तस्याः पतिं वसुदेवं च सुरक्षिते कारागारेऽस्थापयत् ।

अथ गच्छति काले यदा यदा तयोरपत्यम् अजायत तदा तदा स निर्घृणः सद्योजातमपत्यं व्यापाद-यति स्म ।

एवं तेन क्रमेण देवकी-वसुदेवयोः सप्त सन्ततयो हताः। कालक्रमेण पुनस्तयोरष्टमम् अपत्यमजायत।

अस्य शिशोः रूपं नितान्तं विलक्षणमासीत्—वर्णः घनश्यामः। किसलय-पेलवान्यङ्गानि। मुखं नीलोत्पलाभम्। ईदृक्स्वरूपं शिशुं दृष्ट्वा दम्पती परं विस्मयं प्राप्नुताम्। परं परस्मिन्नेव क्षणे कंसस्य नैर्घृण्यं स्मृत्वा तौ चिन्तातुरावभवताम्।

अयं विलक्षणो बालः कंसस्य क्रूराभ्यां पाणिभ्यां रक्षणीयः—इति निश्चितं ताभ्याम्।

चिरं चिन्तयित्वा वसुदेवेन निर्धारितं—येन केनाप्युपायेनायं शिशुरधुनैव स्थानान्तरं प्रापणीयः।

ततः स तं भाविनं श्रीकृष्णं शूर्पे निधाय शिरसि कृत्वा गोकुलाय प्रस्थितः।

प्रभोः प्रसादात् कारागारस्य द्वाराणि स्वयमेव विवृतानि। द्वारपालाश्च निद्रिता अभवन्। कारायाः निभृतं निष्क्रम्य वसुदेवः अचिरेण यमुनाकच्छम् आससाद।

गोकुलं पारेयमुनम् अवस्थितमासीत्। तस्मिन् क्षणे यमुनायामपि महान् जलौघ आसीत्। इतः मेघोऽपि धारासारैः वर्षति स्म। तस्माद् यमुनाया जले प्रविशतः

वसुदेवस्य मनसि महद्भयमजायत । परन्त्वहो ! वसुदेवे जले प्रविष्टमात्रे नद्यां जलं कटिदघ्नम् अभूत् । वसुदेवेन नदी सुखमुत्तीर्णा । अर्धनिशायामसौ गोकुलं प्राप्य शिशुं श्रीकृष्णं स्वमित्रस्य नन्दस्य गृहे संस्थाप्य ततः कन्यां च नीत्वा अलक्षित एव मथुरां प्रत्यावर्तत ।

इत्थंकारं नन्दगृहे प्रापितः कुमारः श्रीकृष्णः कृतकपित्रोः यशोदानन्दयोः गृहे महता स्नेहेन पालितः अवर्धत ।

श्रीकृष्णः गोपबालैः सह वनेषु धेनूनां वत्सानाञ्च चारणेन, मुरल्याः वादनेन, अन्याभिश्च बालानुरूपाभिः क्रीडाभिः यशोदानन्दयोः अन्येषां च सर्वेषाम् आबालवृद्धं गोकुलवासिनां मनांसि अरञ्जयत् ।

यदा श्रीकृष्णः दशवर्षदेशीयोऽभूत्, तदैकदा कंसस्तं मल्लयुद्धाय आहूतवान् । श्रीकृष्णेनामन्त्रणमङ्गीकृतम् । कंसस्य सभां गत्वा तेन बहवो मल्लाः पराजिताः । अन्ते कंसोऽपि व्यापादितः । ततस्तेन स्वपितरौ देवकी-वसुदेवौ बन्धनान्मोचितौ ।

कंसे हते देवकी-वसुदेवाभ्यां श्रीकृष्ण आवयोः पुत्र इति प्रकटितम् । स्वगृहं नीत्वा चोपवीतं कारयित्वा सः विद्याभ्यासाय गुरोः पार्श्वं उपनीतः ।

सकला विद्या अभ्यस्य कालक्रमेण भगवान् श्रीकृष्णो महान् राजनीतिज्ञो धर्म्मज्ञश्चाभवत् ।

सुप्रसिद्धो गीतोपदेशो भगवतः श्रीकृष्णस्यैव ।

अभ्यास

१. लिङ्ग, विभक्ति, वचन लिखकर अर्थ भी दो—
शरदाम् । मथुरायाम् । गच्छति । पाणिभ्याम् । द्वाराणि । महता । अन्येषाम् । भगवतः ।

२. सन्धिच्छेद करो—
देवकीति । तयोरपत्यम् । केनाप्युपायेनायम् । वत्सानाञ्च । बन्धनान्मोचितौ ।

३. संस्कृत-वाक्यों में प्रयुक्त करो—
व्यापादयति । प्रस्थितः । नीत्वा । एकदा । आहूतवान् ।

४. कंस ने वसुदेव तथा देवकी को कारागार में क्यों डाल दिया था ?

५. वसुदेव अपने बालक को कहाँ छोड़ आया था ?

६. संक्षेप से श्रीकृष्ण-चरित्र वर्णन करो ।

गीतोपदेशः

सञ्जय उवाच

तं तथा कृपयाऽऽविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥१॥

श्रीभगवानुवाच

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्य्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ! ॥२॥
क्लैब्यं मास्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ! ॥३॥
अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥४॥
देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥५॥

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ॥६॥

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥७॥
कर्म्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्म्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्म्मणि ॥८॥
नियतं कुरु कर्म्म त्वं कर्म्म ज्यायो ह्यकर्म्मणः ।
शरीरयात्राऽपि च ते न प्रसिद्ध्येदकर्म्मणः ॥९॥

कर्म्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ॥१०॥
यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते ॥११॥
यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत ! ।
अभ्युत्थानमधर्म्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥१२॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म्मसंस्थापनार्थाय संभवामि युगे युगे ॥१३॥
अनाश्रितः कर्म्मफलं कार्य्यं कर्म्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥१४॥
उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥१५॥
बन्धुरात्माऽऽत्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥१६॥
चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ! ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ! ॥१७॥
तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च ।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥१८॥
अनन्याश्चिन्तयन्तो मां ये जनाः पर्य्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥१९॥

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो
लोकान् समाहर्तुमिह प्रवृत्तः ।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः ॥२०॥

तस्मात्त्वमुत्तिष्ठ यशो लभस्व
जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ! ॥२१॥

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥२२॥

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥२३॥

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते ॥२४॥

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥२५॥

सर्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥२६॥

सञ्जय उवाच

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥२७॥

अभ्यास

१. अधोनिर्दिष्ट में सन्धिच्छेद करो—
वाक्यमुवाच । नैनम् । कर्म्मण्येवाधिकारस्ते । रिपुरात्मनः । सुकृतिनोऽर्जुन । प्रियोऽसि । मतिर्मम ।

२. लिङ्ग, विभक्ति, वचन देकर अर्थ भी लिखो—
कृपया । देहिनः । आत्मानम् । वासांसि । माम् । चिन्तयन्तः । त्वाम् ।

३. काल, पुरुष, वचन लिखो—
भाषसे । गृह्णाति । प्रसिध्येत् । सृजामि । भुङ्क्ष्व । अभिधीयते । कुरु ।

४. समस्तपदों का विग्रह लिखकर समासों का नाम लिखो—
अनार्यजुष्टम् । कर्म्मफलहेतुः । अर्थार्थी । भरतर्षभ । कर्म्मफलत्यागी ।

५. अर्जुन में विषाद देख कर भगवान् ने उसे क्या उपदेश दिया ?

६. नरक के कौन से तीन द्वार बतलाये गये हैं ?

युधिष्ठिरस्य कर्त्तव्यपरायणता

एकदा पाण्डवा आचार्य्याद्द्रोणाद् धर्म्मशास्त्रं पठन्ति स्म । पुस्तके "कोपो न कर्त्तव्यः" इति पाठः गुरुणा पाठितः ।

नियमोऽयं प्रतिपालनीयः इति निश्चयं कृत्वा युधिष्ठिरस्सपदि पठनमग्रे उदसृजत्। आचार्य्यो युधिष्ठिरस्यैतच्चेष्टितं दृष्ट्वा परं विस्मयमवाप । परं स तस्य कारणं कथमपि ज्ञातुं नाशक्नोत् । वारं वारमाचार्य्येणादिष्टोऽपि यदा स पाठं न प्रारभत तदाऽऽचार्य्यस्तस्मै भृशमकुप्यत् । क्रोधवशात्तेन स भृशं निर्भर्त्सितस्ताडितश्च । परं युधिष्ठिरेणैतावता कियानपि कोपो न कृतः। सायङ्काले यदाचार्य्येण दिवा पठितस्य पाठस्यावृत्तिः परीक्षा चारब्धा तदा युधिष्ठिरः गुरोः प्रश्नान् सम्यक्तयोत्तरितुं नाशक्नोत् ।

युधिष्ठिरः द्रोणस्य प्रियः शिष्य आसीत् । तस्य तदानीन्तनेन अनुत्तरणेन आचार्य्यस्य हृदयमप्यदूयत ।

अन्येद्युः पाठस्योपक्रमे आचार्य्येण युधिष्ठिरः कथितः—"अङ्ग ! कथयाधुना, केन कारणेन त्वया ह्योऽन्तराल एव पाठ उत्सृष्टः, किमिति च परीक्षायामनुत्तीर्ण इति" ।

युधिष्ठिरः प्रत्यवदत्—"आचार्य्यः प्रसीदतु । अहमात्मानं परीक्षायामनुत्तीर्णं न मन्ये । ह्यस्तनः पाठ आसीत् "कोपो न कर्त्तव्यः" इति । भवद्भिर्भृशं ताडितेन भर्त्सितेनापि मया कोपो न कृतः । अतः क्रोधस्य

संयमेऽहमात्मानं कृतकृत्यमेव मन्ये। अग्रे, आचार्य्याः प्रमाणम्, इति।

तदाकर्ण्य द्रोणः परं प्रामोदत। युधिष्ठिरञ्च भूरि समश्लाघत।

अभ्यास

१. सन्धि करो—
आचार्य्येण + आरब्धा। ताडितः + च। न + अशक्नोत्। भर्त्सितः + अपि। तत् + आकर्ण्य।

२. लिङ्ग, विभक्ति, वचन लिखो—
द्रोणात्। प्रश्नान्। आत्मानम्। परीक्षायाम्। युधिष्ठिरम्।

३. काल, पुरुष, वचन बतलाओ—
अकुप्यत्। अदूयत। मन्ये। अश्लाघत।

४. युधिष्ठिर ने क्या पाठ पढ़कर आगे पढ़ना छोड़ दिया था?

५. गुरु द्रोण क्यों युधिष्ठिर पर अप्रसन्न हो गया था? अन्त में गुरु की प्रसन्नता का क्या कारण बना?

ध्रुवचरितम्

श्रीभगवतो नारायणाद् ब्रह्माऽजायत। ब्रह्मणो मनुरभूत। मनोः प्रियव्रतोत्तानपादौ द्वौ पुत्रौ जातौ। तत्रोत्तानपादस्य सुनीतिः सुरुचिश्चेति द्वे स्त्रियौ। तत्र सुरुचिः पत्युः प्रिया। यस्या पुत्रो ध्रुवः, सा सुनीतिर्न प्रिया। एकदा राजा सुरुचेरुत्तमनामकं पुत्रमङ्कमारोप्य

लालयन् अङ्कमारोढुमिच्छन्तं ध्रुवं नाभ्यनन्दत् । सुरुचिस्तथाङ्कारोहणं कुर्वन्तं ध्रुवं सेर्ष्यं जगाद—"हे वत्स ! त्वं नृपतेरङ्कमारोढुं नार्हसि । यतस्त्वं मया गर्भे न धृतः । एवं मनोरथश्चेत् तर्हि तपसा हरिमाराध्य तत्कृपया मे गर्भे आत्मनो जन्म प्राप्त्यर्थं यत्नं कुरु ।"

सपत्न्या मातुर्दुर्वचनबाणैर्विद्धो ध्रुवः रुदन् मातुः समीपं जगाम । सुनीतिः सपत्न्या वाक्यम् अन्तःपुरजनमुखाच्छ्रुत्वा निश्वसन्तं रुदन्तं बालमुत्सङ्गे धृत्वा धैर्य्यं त्यक्त्वा शोकेन विललाप । जगाद च—"हे तात ! त्वं परकृतं दुर्भाषणरूपमपराधं मा स्म चिन्तयः । यो मनुष्यः परेभ्यो दुःखं ददाति स कालान्तरे तद् दुःखं स्वयमेव भुङ्क्ते । त्वं च भाग्यहीनाया ममोदरे जातोऽसि । अतः सुरुच्या यद् वाक्यमुक्तं तत्सत्यम् । त्वं यदि राज्यासनमिच्छसि तर्हि भगवन्तमाराधय । हरेर्विनाऽन्यं तव दुःखच्छिदमहं न पश्यामि" इति ।

एवं मातुर्वचः श्रुत्वा ध्रुवः पितुः पुरान्निर्जगाम । नारदमहर्षिर्ध्रुवचिकीर्षितं ज्ञात्वा, तत्रागत्य च प्रणतं तं पाणिना मूर्ध्नि स्पृष्ट्वोवाच—"हे पुत्रक ! पुरुषस्य सुखं दुःखं वा निजकर्म्मभिरेव भवति । ईश्वरानुकूल्यं विनोद्योगाः सफला न भवन्ति । हे पुत्र ! मात्रोपदिष्टेनोपायेन

यस्य देवस्य प्रसादं सम्पादयितुमिच्छसि, स ईशो दुःखेनाराध्य इति मम मतम् । सुखं दुःखञ्च दैवानुरूपं लभ्यते । अतो गुणैरधिकं दृष्ट्वा प्रीतिं कुर्य्यान्नेर्ष्याम् । गुणैर्हीनं दृष्ट्वा कृपां कुर्य्यान्न तिरस्कारम् । गुणैस्समं दृष्ट्वा मैत्रीं कुर्य्यान्न स्पर्धाम् । एवं कृते सति दुःखं नाप्नोति" ।

ध्रुवः प्राह—"हे महर्षे ! भवता सुखदुःखसमचित्तानां पुंसामयं मार्गो दर्शितः । परं स सुरुच्या दुर्वचनवाणैर्भिन्ने मम हृदि न तिष्ठति । अन्यैरसम्पादितं सर्वोत्कृष्टं स्थानमिच्छतो ममोपायं ब्रूहि । भवान् पर्य्यटति लोकहितार्थं सूर्य्यवत्" । इति ।

एतदाकर्ण्य नारदः प्रीतः सन् तं जगाद—"हे बाल ! तव जनन्या यो मार्गः कथितः स एव ते इष्टकार्य्यसाधकः, स च भगवान् वासुदेव एव । अतस्तं भज । तस्मात् हे तात ध्रुव ! त्वं मधुवने गत्वा तत्र यमुनाजले त्रिकालं स्नात्वाऽऽसने उपविश्य यमनियमान् धृत्वा प्राणायामेन मनोमलं हित्वा मनसा भगवन्तं हरिमेकाग्रचित्तेन ध्यायेः । एवं ध्यानं कुर्वतः पुंसो मनः विषयेषु न सज्जते" ।

एवं नारदवचः श्रुत्वा ध्रुवस्तं प्रदक्षिणीकृत्य प्रणम्य

च मधुवनं ययौ। तत्र गत्वा तां रात्रिमुपोष्यैकाग्रचित्तः सन् हरिं पूजयामास। हरिरपि गरुडमारुह्य मधुवनं ययौ। ध्रुवो हृदिस्थं सहसैवान्तर्हितं दृष्ट्वा व्युत्थितस्सन् यादृशोऽन्तःकरणे स्फुरितः तादृशं हरिं बहिःस्थितं ददर्श। तद्दर्शनेन जातसम्भ्रमस्सन् दृग्भ्यां प्रपिबन्निव पश्यन् भूमौ दण्डवत् प्रणनाम।

ततो हरिः स्वगुणान् वर्णयितुमिच्छन्तं तं ज्ञात्वा तस्य कपोले शङ्खेन स्पर्शं कृतवान्। तदा शङ्खस्पर्शमात्रेणोत्पन्नज्ञानः स ध्रुवो भक्त्या प्रेमयुक्तस्सन् तं हरिं तुष्टाव।

अभ्यास

१. सन्धिच्छेद करो—
मनुरभूत्। यतस्त्वम्। ममोदरे। जातोऽसि। हरिरपि। प्रपिबन्निव।

२. काल, पुरुष, वचन लिखो—
अर्हसि। ददाति। पश्यामि। ब्रूहि। भज।

३. अधोनिर्दिष्ट पदों का परिचय दो—
लालयन्। हित्वा। कृतवान्। आराध्यः। व्युत्थितः।

४. समस्त पदों का विग्रह देकर समासों के नाम लिखो—
परकृतम्। ध्रुवचिकीर्षितम्। इष्टकार्य्यसाधकः। जातसम्भ्रमः। उत्पन्नज्ञानः।

५. ध्रुव माता के किन वचनों से विद्ध होकर तपस्या के लिए वन में गया था?

६. नारद ने प्रभुप्राप्ति का क्या उपाय ध्रुव को बताया था ?
७. ध्रुव-कथा से क्या शिक्षा प्राप्त होती है ?

सुभाषित-प्रशंसा

भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।
तस्या हि काव्यं मधुरं तस्मादपि सुभाषितम् ॥१॥
पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥२॥
धर्म्मो यशो नयो दाक्ष्यं मनोहारि सुभाषितम् ।
इत्यादि - गुणरत्नानां संग्रही नावसीदति ॥३॥
द्राक्षाम्लानमुखी जाता शर्करा चाश्मतां गता ।
सुभाषितरसस्याग्रे सुधा भीता दिवं गता ॥४॥

विद्या-प्रशंसा

विद्या ददाति विनयं विनयाद् याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद् धर्म्मं ततः सुखम् ॥१॥
रूपयौवन - सम्पन्ना विशालकुल - सम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥२॥

मातेव रक्षति पितेव हिते नियुङ्क्ते,
कान्तेव चापि रमयत्यपनीय खेदम्।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिम्,
किं किं न साधयति कल्पलतेव विद्या ॥३॥

विद्या नाम नरस्य रूपमधिकम्, प्रच्छन्नगुप्तं धनम्,
विद्या भोगकरी यशःसुखकरी, विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने, विद्या परं दैवतम्,
विद्या राजसु पूजिता न तु धनम्, विद्याविहीनः पशुः ॥४॥

न चौरहार्य्यं न च राजहार्य्यम्,
न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यम्,
विद्याधनं सर्वधनप्रधानम् ॥५॥

अभ्यास

१. लिङ्ग, विभक्ति, वचन देकर अर्थ लिखो—
भाषासु। तस्याः। तस्मात्। संग्रही। पृथिव्याम्।

२. पद-परिचय दो—
आप्नोति। वितनोति। हार्य्यम्। वर्धते। शोभन्ते।

३. समस्त पदों का विग्रह करके समासों का नाम लिखो—
म्लानमुखी। विशालकुलसम्भवाः। विद्याधनम्। चौरहार्य्यम्।

४. रिक्त स्थानों की पूर्ति करो—
(क) विद्या विनयं.........

(ख) विनयात् पात्रतां.........
(ग) विद्या किं किं न.........
(घ) विद्याधनं.........

५. भाषाओं में कौन-सी मुख्य भाषा है ? उसकी मुख्यता को सकारण प्रमाणित करो।

६. विद्या को सर्वोत्कृष्ट धन क्यों कहा गया है ?

विद्याभ्यासः

विद्याविषये परमः फलवान् यत्न आर्य्यैरादृत आसीत्। विद्यार्थिनमुपगतं धनानपेक्षया विद्यामध्यापयामासुः। राजभिश्च विद्यामन्दिराणि राजधानीषु परिकल्पितानि।

माणवकस्यावरतो द्वादशवर्षाणि गुरुकुले वासो भवेत्, स गुरुं भक्त्या शुश्रूषमाणो विद्याम् अधीयीत, अथ यथाशक्ति दक्षिणां गुरवे समर्प्य स गुरुकुलात् समावर्तेत। इत्येषा पुरातनी विद्याभ्यासरीतिः।

समावर्तमानञ्च शिष्यं गुरुरेवमनुशास्ति—सत्यं वद। धर्म्मं चर। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। यान्यनवद्यानि कर्म्माणि तानि सेवितव्यानि नो इतराणि॥

न केवलं पुरुषाः, स्त्रियोऽपि पुरा विद्यां निरङ्कुशम् अभ्यस्यन्ति स्म । ताः किल ब्रह्मविद्यायामपि निपुणा बभूवुरिति उपनिषद् अस्मान् बोधयति ।

ये विद्वांसो ये च प्रवक्तारः, तेष्वसामान्यो बहुमानो राज्ञां जनानां चासीत् । अतश्च विद्याभ्यासे बाला अतिमात्रम् उद्यमिनोऽभवन् ।

अभ्यास

१. लिङ्ग, विभक्ति, वचन लिखकर अर्थ भी साथ लिखो—
विद्यार्थिनम् । भक्त्या । गुरवे । कर्म्माणि । ब्रह्मविद्यायाम् ।

२. समस्त पदों का विग्रह करके समासों के नाम भी दो—
विद्यामन्दिराणि । यथाशक्ति । ब्रह्म-विद्यायाम् । असामान्यः । अनवद्यानि ।

३. काल, पुरुष, वचन लिखकर अर्थ भी लिखो—
आसीत् । समावर्तेत । अनुशास्ति । चर । बोधयति । अभवन् ।

४. प्राचीन विद्याभ्यास की क्या रीति थी ?

५. गुरुकुल से लौटते हुए विद्यार्थी को गुरु क्या उपदेश देते थे ?

६. उपनिषदें हमें क्या बतलाती हैं ?

विधिसृष्टपदार्थविचारः

कोऽपि भूपो विधिसृष्टानां पदार्थानां प्रयोजनविचारे कुतूहलयुक्तोऽभवत् । स चिरकालं विचारेण सर्वं वस्तु

सप्रयोजनमेवापश्यत् । परं मक्षिका ऊर्णनाभाश्च कस्मै प्रयोजनाय सृष्टाः ? इति चिरं विचारयन्नपि न ज्ञातुं शक्तः ।

अनुपयुक्ता एव त इति निश्चित्य तेषां वधाय लग्नो भूतः । अथ कदाचिन्महति युद्धे शत्रुभिः पराजितः स किं कर्त्तव्यमिदानीमिति ज्ञानशून्यः क्वचिदरण्ये परिभ्रम्य श्रान्तः रात्रौ कस्यापि वृक्षस्य मूले सुप्तः ।

तमेनमुपलक्ष्य कोऽपि शत्रुसैनिकः खड्गपाणिः यावदागच्छति तावदोष्ठे मक्षिकया दष्टः प्रबुद्धः ।

अथ अत्याहितमुपस्थितं पश्यन् सहसाऽन्यत्र पलाय्य कस्याञ्चिद् गुहायां निलीय स्थितः ।

तदा गुहास्थितो राजा द्वयोः शत्रुभटयोरात्मान्वेषिणोः संलापमाकर्णयत् । तयोरेकोऽवदत्—"अस्यां गुहायां निलीनः स्यात्" इति ।

अपरेणोक्तम्—"नैषा सम्भावना यत इदं तन्तुजालं त्रुटितमाकुलञ्च भवेत् ।" इति । अथ तावुभौ तां गुहां शून्यां विचार्य्य यथागतं गतौ । स राजा पुनर्जातमात्मानं मन्यमानो बद्धाञ्जलिः ईश्वरस्तुतिमकरोद्—"भगवन् ! पूर्वेद्युरहं मक्षिकया रक्षितः, अद्य पुनर्

ऊर्णनाभेन ।

विविधैः प्रकारैर्महान्तमुपकारं मानुषाणामुपजनयति ते सृष्टिः । न विफलां तव काञ्चित् सृष्टिं पश्यामि ।" इति । एवं स्तुत्वा स्वनगरं प्राप्य स राजा प्रजाः पालयन् सुचिरं सुखमवसत् । तथा चोक्तम्—

वस्तुषु ब्रह्मसृष्टेषु स्थावरेषु चरेषु च ।
सफलं दृश्यते सर्वं, विफलं नैव दृश्यते ॥

अभ्यास

१. लिङ्ग, विभक्ति, वचन लिखो—
पदार्थानाम् । प्रयोजनाय । रात्रौ । गुहायाम् । एषा ।
२. सुप्तः । विचार्य्य । स्तुत्वा । पालयन् । दृश्यते । इन रूपों के प्रकृति प्रत्यय लिखें ।
३. समस्त पदों का विग्रह लिखकर समासों के नाम लिखो—
सप्रयोजनम् । खड्गपाणिः । कुतूहलयुक्तः । ब्रह्मसृष्टेषु ।
४. राजा देर तक विचार करता हुआ भी क्या नहीं समझ सका ?
५. किस तरह राजा को पता चला कि ईश्वर की रचना में प्रत्येक वस्तु का कोई न कोई अवश्य प्रयोजन है ?

भोजकुमारस्य राज्यप्राप्तिः

पुरा धाराराज्ये सिन्धुलसंज्ञो राजा चिरं प्रजाः पर्य्यपालयत् । वृद्धावस्थायां तस्य भोज इति पुत्रोऽजायत ।

स यदा पञ्चहायनः, तदा पिता ह्यात्मनो जरां विज्ञाय मुख्यामात्यानाहूय अनुजं मुञ्जं महाबलमालोक्य पुत्रञ्च बालं निरीक्ष्य विचारयामास—"यद्यहं राजलक्ष्मीभार-धारणसमर्थं सोदरमपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवादः। अथवा बालं मे पुत्रं मुञ्जो राज्यलोभाद् विषादिना मारयिष्यति, तदा दत्तमपि राज्यं वृथा। पुत्रहानिर्वंशोच्छेदश्च।

"मातरं पितरं पुत्रं भ्रातरं वा सुहृत्तमम्।
लोभाविष्टो नरो हन्ति स्वामिनं वा सहोदरम्" ॥१॥

इति विचार्य्य राज्यं मुञ्जाय दत्त्वा तदुत्सङ्गे भोजमात्मजं मुमोच।

ततः क्रमाद् राज्ञि परलोकं प्रस्थिते सम्प्राप्तराज्य-सम्पत्तिर्मुञ्जो मुख्यामात्यं बुद्धिसागरनामानं व्यापार-व्याजेन दूरीकृत्य तत्पदेऽन्यं नियोजयामास। ततो गुरुभ्यः क्षितिपालपुत्रं पाठयति।

अथैकदा सभायां ज्योतिःशास्त्रे प्रवीणः सकलविद्या-पारङ्गतः कश्चिद्ब्राह्मणः समागतः। राज्ञे "स्वस्ति" इत्युक्त्वोपविष्टः, राजानमवदच्च—"देव! लोकोऽयं मां सर्वज्ञं कथयति, तत् किमपि मां पृच्छतु भवान्"।

राजाऽपि विप्रस्याहंभावमाकर्ण्य—"जन्मारभ्यैतत्क्षण-पर्य्यन्तं यद्यन्मयाऽऽचरितं तत्सर्वं वदतु यदि भवान् सर्वज्ञ एव" इत्युवाच ।

ततो ब्राह्मणोऽपि राज्ञा यद्यत्कृतं तत्सर्वमुवाच गूढ-व्यापारमपि । ततः सभायामासीनो बुद्धिसागरो राजानं प्राह—"देव, भोजस्य जन्मपत्रिकां ब्राह्मणं पृच्छ" इति । तदाकर्ण्य मुञ्जो ब्राह्मणमुवाच—"भोजस्य जन्मपत्रिकां विधेहि" इति ।

ततोऽसौ ब्राह्मणः प्रत्यभाषत—"अध्ययनशालाया भोज आनेतव्यः" इति ।

मुञ्जोऽपि ततः कौतुकादध्ययनशालामलङ्कुर्वाणं भोजं भटैरानाययामास । ततः साक्षात् पितरमिव राजानं प्रणम्य सविनयं बालकस्तस्थौ ।

मूर्तिमत्सौभाग्यमिव भोजं निरीक्ष्य राजानं प्राह दैवज्ञः—"राजन् ! भोजस्य भाग्योदयं वक्तुं विरञ्चिरपि नालम् । तथापि कथयामि स्वमत्यनुसारम् । भोज-मध्ययनशालां प्रेषय" इति । ततो राजादेशेन भोजे-ऽध्ययनशालां गते विप्रः प्राह—

"पञ्चाशत् पञ्चवर्षाणि सप्तमासदिनत्रयम् ।
भोजराजेन भोक्तव्यः सगौडो दक्षिणापथः" ॥२॥ इति

तदाकर्ण्य राजा विच्छायवदनोऽभूत्। दैवज्ञं च सम्प्रेष्य निशीथे शयनमासाद्य व्यचिन्तयत्—"यदि राजलक्ष्मी-र्भोजकुमारं गमिष्यति, तदाहं जीवन्नपि मृतकल्पः।

जातमात्रं न यः शत्रुं व्याधिं वा प्रशमं नयेत्।
अतिपुष्टाङ्गयुक्तोऽपि स पश्चात्तेन हन्यते" ॥३॥

इति विमृश्य वङ्गदेशाधीश्वरस्य महाबलस्याकारणाय स्वमङ्गरक्षकं प्राहिणोत्।

ततः रथमारुह्य समागतः सपरिवारः वत्सराजः रथादवतीर्य्य राजानमवलोक्य प्रणिपत्योपविष्टः। राजा चैकान्ते वत्सराजं प्राह—"त्वया निशीथे भोजो भुवने-श्वरीविपिने हन्तव्यः, शिरश्चान्तःपुरमानेतव्यम्" इति। स चोत्थाय नृपं नत्वाह—"देवादेशः प्रमाणम्, तथापि भवदाज्ञया किमपि वक्तुकामोऽस्मि, सापराधमपि मे वचः क्षन्तव्यम्।

भोजे द्रव्यं न सेना वा परिवारो बलान्वितः।
परं पोत इवास्तेऽद्य स हन्तव्यः कथं प्रभो" ॥४॥

ततो राजा प्रातः सभायां प्रवृत्तं सर्वं वृत्तमकथयत्। स च श्रुत्वा हसन्नाह—

"उचितमनुचितं वा कुर्वता कार्य्यजातं,
परिणतिरवधार्य्या यत्नतः पण्डितेन।

अतिरभसकृतानां कर्म्मणामाविपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥५॥

हतेऽस्मिन् बृहद्बलस्य राज्ञः सिन्धुलस्य ये परमसुहृदो महावीरास्ते त्वन्नगरमुल्लोलकल्लोलाः पयोधय इव स्रावयिष्यन्ति। चिराद् बद्धमूलेऽपि त्वयि प्रायः पौरा भोजं भुवो भर्तारं भावयन्ति। देव! पुत्रवधः क्वापि न हिताय" इत्युक्तं वत्सराजवचनमाकर्ण्य राजा कुपितः प्राह—"त्वमेव राज्याधिपो न तु सेवकः" इति।

ततो वत्सराजः "साम्प्रतं मौनाश्रयणमेवोचितम्" इति मत्वा तूष्णीं बभूव।

ततः स्वसेवकान् स्वागारपरित्राणार्थं सम्प्रेष्य रथं भुवनेश्वरीभवनाभिमुखं विधाय भोजकुमाराकारणाय प्राहिणोदेकं वत्सराजः।

सेवकाद् विदितवृत्तान्तो भोजः कुपितो ज्वलन्निव शोणितेक्षणः समेत्य प्राह—"आः पाप! राज्ञो मुख्यकुमारमेकाकिनं मां राजभवनाद् बहिरानेतुं तव का नाम शक्तिः" इति।

वत्सराजः प्राह—"भोज! न वयमपराधिनः। राजादेश एवात्र कारणम्" इत्यभिधाय बालं रथे निवेश्य जगामाशु महामायाभवनम्। ततो यथार्थं नीते भोजे

लोकाः कोलाहलं चक्रुः । हुंभावश्च प्रवृत्तः ।

ततः सावित्रीसंज्ञा भोजस्य जननी विश्वजननीव स्थिता दासीमुखात् स्वपुत्रस्थितिमाकर्ण्य कराभ्यां नेत्रे पिधाय रुदती प्राह—"पुत्र ! निरनुक्रोशेन पितृव्येन कां दशां नीतोऽसि ? ये मया नियमा उपवासाश्च त्वत्कृते कृताः तेऽद्य मे व्यर्थतामवाप्ताः । पुत्र ! एवं दासीवर्गं सहसा विच्छिन्नशिरसं पश्य" इत्युक्त्वा भूमावपतत् ।

ततोऽस्तङ्गते सूर्ये महामायाभवनमासाद्य प्राह भोजं वत्सराजः—"कुमार ! ज्योतिःशास्त्रज्ञेन केनचिद्विदुषा तव राज्यप्राप्तावुदीरितायां राज्ञा भवद्वधो व्यादिष्टः" इति ।

वत्सराजतो विज्ञाय सर्वं भोजः प्राह—

"राम-प्रव्रजनं बलेर्नियमनं पाण्डोः सुतानां वनम्,
वृष्णीनां निधनं नलस्य नृपतेः राज्यात् परिभ्रंशनम् ।
कारागारनिषेवणञ्च मरणं सञ्चिन्त्य लङ्केश्वरे,
सर्वः कालवशेन नश्यति नरः को वा परित्रायते" ॥६॥

ततो जङ्घां छुरिकया छित्त्वा तद्रक्तेन पत्र एकस्मिन् कश्चन श्लोकं लिखित्वा वत्सराजं प्राह—"महाभाग ! एतत् पत्रं नृपाय दातव्यम्, त्वमपि राजाज्ञां विधेहि" इति ।

ततो वत्सराजस्यानुजो भ्राता भोजस्य प्राणपरित्याग-समये दीप्यमानमुखश्रियमवलोक्य प्राह—

"तुल्यजातिवयोरूपान् हतान् पश्यसि मृत्युना ।
नहि तत्रास्ति ते त्रासः वज्रवद् हृदयं तव" ॥७॥

ततो वैराग्यमापन्नो वत्सराजः भोजं 'क्षमस्व' इत्युक्त्वा तश्च रथे निवेश्य गाढेऽन्धकारे गृहं नीतवान् । भूमिगृहान्तरे निक्षिप्य भोजं ररक्ष च ।

स्वयमपि कृत्रिमविद्याविद्भिः सकुण्डलं निमीलितनेत्रं भोजकुमारमस्तकं कारयित्वा तच्चादाय राजभवनं गत्वा राजानं नत्वा प्राह—"श्रीमता यदादिष्टं तत् साधितम्" इति ।

ततो राजा पुत्रवधं विज्ञाय तमाह—"वत्सराज ! प्राणप्रयाणसमये पुत्रेण किं व्याहृतम्" इति ।

वत्सराजस्तत्पत्रमदात् । राजा तानि पत्राक्षराणि वाचयति—

"मान्धाता च महीपतिः कृतयुगालङ्कारभूतो गतः,
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ?
अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूपते !
नैकेनापि समं गता वसुमती नूनं त्वया यास्यति" ॥८॥

राजा च तदर्थं विज्ञाय शय्यातो भूमौ पपात ।

पुत्रघातिनमात्मानं बहुशो निनिन्द च।

ततो द्वारपालानाहूय पुत्रवधप्रायश्चित्तविज्ञानार्थं धर्म्माचार्य्यानानेतुमादिदेश।

ततः स्वादेशेन समागतान् धर्म्माचार्य्यान् सत्कृत्य सादरं नृपः प्राह—"मया पुत्रो हतः, तस्य प्रायश्चित्तं ब्रूत" इति। पश्चात्तापं विदधानं ते तमूचुः—"राजन्! सहसा वह्निमाविश" इति।

ततो रात्रावेव वह्निप्रवेशनं निश्चितवति राज्ञि "पुत्रं हत्वा पापभयाद् भीतो नृपो वह्निं प्रविशति" इति किंवदन्ती सर्वत्र प्रसरतामवाप्ता।

ततो राजमरणवार्तामाकर्ण्य वत्सराजो गृहमागत्य बुद्धिसागरं नत्वा शनैः तस्य कर्णे किमपि कथयित्वा निष्क्रान्तः।

ततो मुहूर्तेन कोऽपि विरचितप्रत्यग्रजटाकलापः कौशेय-कौपीनः कापालिकः सभां समागतः।

तां निरीक्ष्य बुद्धिसागरः प्राह—"योगीन्द्र! कुत आगम्यते? कुत्र ते निवेशश्च? कापालिके त्वयि यश्च-मत्कारो कलाविशेष औषधविशेषो वास्ति तत् कथय"। इति। योगी प्राह—

"ग्रामे ग्रामे कुटी रम्या, निर्झरे निर्झरे जलम् ।
भिक्षायां सुलभं चान्नं विभवैः किं प्रयोजनम् ॥६॥

देव ! अस्माकं नैको देशः सकलभूमण्डलं भ्रमामः, गुरूपदेशे तिष्ठामः, निखिलं भुवनतलं करतलामलकवत् पश्यामः, नानाविधरोगग्रस्तं विगतसकलव्याधिसञ्चयं कुर्म्मः" । इति ।

राजाऽपि श्रुतसकलवृत्तान्तः सभामागतः । कापालिकं दण्डवत् प्रणम्य "योगीन्द्र ! महापापिना मया हतस्य पुत्रस्य प्राणदानेन मां रक्ष" इत्याह ।

अथ कापालिकोऽपि "राजन् ! मा भैषीः, पुत्रस्ते न मरिष्यति, शिवप्रसादेन गृहमेष्यति, परं श्मशानभूमौ बुद्धिसागरेण सह होमद्रव्याणि प्रेषय" इत्यवोचत् । ततो राज्ञि कापालिकेन यदुक्तं तत्सर्वं तथा कुर्वति बुद्धिसागरः गतः । रात्रौ गूढरूपेण भोजोऽपि तत्र नदीपुलिने नीतः । "योगिना भोजो जीवितः" इति सर्वत्र प्रथा च समभूत् । ततो गजेन्द्रारूढो वन्दिभिः स्तूयमानो भोजराजो राजभवनमगात् ।

राजा च तमालिङ्ग्य रोदिति ।

भोजोऽपि रुदन्तं मुञ्जं निवार्य्यास्तौषीत् । ततः संतुष्टो राजा निजसिंहासने भोजं निवेश्य छत्रचामराभ्यां

भूषयित्वा तस्मै राज्यं ददौ । निजपुत्रेभ्यः प्रत्येकमेकैकं ग्रामं दत्वा परमप्रेमास्पदं जयन्तं भोजनिकाशे निवेशयामास ।

ततः परलोकपथिको मुञ्जो निजपट्टराज्ञीभिः सह तपोवनभूमिं गत्वा तपस्तेपे ।

भोजभूपालश्च देवब्राह्मणप्रसादाद् राज्यं पालयामास । राज्ञो भोजस्य यशः सर्वत्र प्रसृतमासीत् । तदीयं राज्यञ्च सुखेन समृद्ध्या विद्यया च पूर्णमासीत् ।

अभ्यास

१. सन्धिच्छेद करो—
पुत्रश्च । तदुत्सङ्गे । इत्युक्त्वोपविष्टः । लोकोऽयम् । ततोऽसौ । हतेऽस्मिन् । स्वयमपि । गृहमागत्य । निवेशश्च । प्रत्यहम् ।

२. लिङ्ग, विभक्ति, वचन लिखो—
सुहृदः । कराभ्याम् । नेत्रे । एकाकिनम् । महोदधौ । राज्ञीभिः । समृद्ध्या ।

३. रिक्त स्थानों की पूर्ति करो—
(क) सिन्धुलाख्यो नृपः प्रजां...........
(ख) लोकोऽयं मां सर्वज्ञ............
(ग) बुद्धिसागरो राजानं.........
(घ) तदाहं जीवन्नपि..........

४. समस्तपदों का विग्रह लिखकर समासों का नाम लिखो और अर्थ भी लिखो—

अध्ययनशालाम् । शल्यतुल्यः । शोणितेक्षणः । विच्छिन्न-शिरसं । श्रुतसकलवृत्तान्तः ।

५. मुञ्ज ने भोज को मारने का आदेश क्यों दिया था ?
६. भोज ने किसे, क्या, किस अवसर पर पत्र लिखा था ? उसका परिणाम क्या रहा ?

शकुन्तलाम्प्रति कण्वोपदेशः

काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला ।
तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम् ॥

(ततः प्रविशति स्नानोत्तीर्णः कण्वः)

कण्वः—यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः,
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥१॥

(इति परिक्रामति)

सख्यौ—हला शकुन्तले, अवासितमण्डनासि । परिधत्स्व साम्प्रतं क्षौमयुगलम् ।

(शकुन्तलोत्थाय परिधत्ते)

गौतमी—जाते ! एष त आनन्दपरिवाहिणा चक्षुषा परिष्वज्यमान इव गुरुरुपस्थितः । आचारं तावत्प्रतिपद्यस्व ।

शकुन्तला—(सव्रीडम्) तात, वन्दे !

कण्वः—वत्से,

यथातेरिव शर्म्मिष्ठा भर्तुर्बहुमता भव ।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥२॥

गौतमी—भगवन् ! वरः खल्वेषः । नाशीः ।

कण्वः—वत्से, इतः सद्यो हुताग्नीन्प्रदक्षिणीकुरुष्व ।

(सर्वे परिक्रामन्ति)

अमी वेदिं परितः क्लृप्तधिष्ण्या,
समिन्धन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नन्तो दुरितं हव्यगन्धै-
र्वैतानास्त्वां वह्नयः पावयन्तु ॥३॥

वत्से, प्रतिष्ठस्वेदानीम् । (सदृष्टिक्षेपम्) क्व ते शार्ङ्गरवमिश्राः ?

शिष्यः—भगवन्, इमे स्मः ।

कण्वः—भगिन्यास्ते मार्गमादेशय ।

शार्ङ्गरवः—इत इतो भवती ।

(सर्वे परिक्रामन्ति)

कण्वः—भो भोः संनिहितास्तपोवनतरवः,

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या,
नादत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम् ।

आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः,
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥४॥

शकुन्तला—(सप्रणामं परिक्रम्य) (जनान्तिकम्) हला, प्रियंवदे, नन्वार्य्यपुत्रदर्शनोत्सुकाया अप्याश्रमपदं परित्यजन्त्या दुःखेन मे चरणौ पुरतः न प्रवर्तेते ।

प्रियंवदा—न केवलं तपोवनविरहकातरा सख्येव । त्वयोपस्थितवियोगस्य तपोवनस्यापि तावत्समवस्था दृश्यते ।

उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः ।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः ॥५॥

शकुन्तला—कथमिदानीं तातस्याङ्कात्परिभ्रष्टा मलय-तरून्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्ये ।

कण्वः—वत्से, किमेवं कातरासि ?

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे,
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ।
तनयमचिरात्प्राचीवार्कं प्रसूय च पावनं,
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥६॥

शकुन्तला—तात, कदा नु भूयस्तपोवनं प्रेक्षिष्ये ।

कण्वः—वत्से, श्रूयताम्—

भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य ।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥७॥

शकुन्तला—(भूयः पितरमाश्लिष्य) तपश्चरण-पीडितं तातशरीरम् । तन्मातिमात्रं मम कृत उत्कण्ठस्व ।

कण्वः—(सनिःश्वासम्)

शममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वम् ।
उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥८॥

गच्छ, शिवास्ते पन्थानः सन्तु ।

(निष्क्रान्ता शकुन्तला सहयायिनश्च ।)

सख्यौ—(शकुन्तलां विलोक्य) हा धिक्, हा धिक् । अन्तर्हिता शकुन्तला वनराज्या ।

कण्वः—(सनिःश्वासम्) अनसूये, गतवती वां सह-धर्म्मचारिणी, निगृह्य शोकमनुगच्छतं मां प्रस्थितम् ।

उभे—तात, शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशावः ।

कण्वः—स्नेहप्रवृत्तिरेवंदर्शिनी । (सविमर्शं परि-क्रम्य) हन्त भोः शकुन्तलां पतिकुलं विसृज्य लब्ध-

मिदानीं स्वास्थ्यम् । कुतः ।

अर्थो हि कन्या परकीय एव
तामद्य सम्प्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा ॥६॥

(इति निष्क्रान्ताः सर्वे)

अभ्यास

१. सन्धिच्छेद करो—

यास्यत्यद्य । सेव । भगिन्यास्ते । भवत्युत्सवः । कृत्यैस्तस्य । पुनराश्रमे ।

२. समस्त पदों के विग्रह देकर समासों के नाम तथा उनके अर्थ लिखो—

अवसितमण्डना । श्रान्तसंस्तीर्णदर्भाः । तपोवन-विरह-कातरा । तपश्चरणपीडितम् । उटज-द्वारविरूढम् ।

३. अधोनिर्दिष्ट का पदपरिचय दो—

यास्यति । उत्थाय । पावयन्तु । स्मः । अनुज्ञायताम् । सन्तु । विलोक्य ।

४. काव्यों में नाटक तथा नाटकों में शकुन्तला को क्योंकर उत्कृष्ट पद दिया गया है ?

५. शकुन्तला की विदाई पर कण्व की दशा का चित्रण करो ।

६. कण्व द्वारा दिए गए शकुन्तला को उपदेश का सार अपने शब्दों में लिखो ।

अध्येतारो बालाः

विद्यामधीयाना बालाः प्रायेण रात्रेश्चरमे यामे प्रबुध्यन्ते। अधीतान् पाठान् असकृद् वाचयन्तस्तदर्थम् एकाकिनः ससहाया वा ते चिन्तयन्ति। सूर्य्योदयात् प्राक् परतो वा बहिर्विहृत्य नद्यां स्नान्ति। शीतालवस्तु गृह उष्णोदकेन स्नान्ति। सौकर्य्याभावे देहमार्द्रवस्त्रेण केवलम् उद्वर्तयन्ति। स्नानानन्तरं बालाः पुण्ड्रं धृत्वा यथोपपन्नमन्नं भुञ्जते। गच्छन्ति च पाठालयम्। उपनीताश्चेद् बालाः यथाकालं सन्ध्यामुपास्यैवान्नं भुञ्जते।

सायाह्ने बालाः पाठालयाद् विसृष्टाः कन्दुकादिक्रीडया लङ्घन-धावन-कूर्दनादिभिर्व्यायामैश्च द्वित्रान् मुहूर्तान् नयन्ति। आङ्गलभाषाध्यायिनां क्रीडा आङ्गलरीतिमेव प्रायेणानुसरन्ति। ततो रात्रौ भुक्त्वा प्रायेणादशमहोरं पुस्तकानि परिशीलयन्ति। दक्षाः केचिद् बाला ईषत्करेषु गृहकार्य्येष्वपि व्याप्रियन्ते पठनम् अबाधमानाः।

आङ्गलभाषाध्यायिषु बहवो रात्रावत्यल्पमेव समयं स्वपन्ति। आसन्नायां तु परीक्षायां रात्रिमखिलां पुस्तकं वाचयन्ति। तम् एतम् अतिश्रमम् आरोग्यभञ्जकम् इतरभाषाध्यायिनो नोपाददते।

प्रबुद्धतराः कुमारा अनध्यायेषु स्थिरमस्थिरं वा

समाजं मेलयित्वा तत्र चोदचमान् विषयान् उपन्यस्यन्ति।

अपि च प्रायेण मातापितृभ्याम् गृहे बालास्तथा परिशील्यन्ते यथा तेषाम् ईश्वरे भक्तिः श्रद्धा च जायेत।

अभ्यास

१. सन्धिच्छेद करो—
रात्रेश्चरमे। शीतालवस्तु। व्यायामैश्च। रात्रावल्पमेव। बालास्तथा।

२. अधोनिर्दिष्ट पदों का परिचय दो—
प्रबुध्यन्ते। भुञ्जते। भुक्त्वा। मेलयित्वा। जायेत।

३. रिक्तस्थानों की पूर्ति करो—
(क) बालाः रात्रेश्चरमे यामे·········
(ख) छात्राः सन्ध्यां कृत्वान्नं·········
(ग) तत्र·········विषयान् उपन्यस्यन्ति।
(घ) छात्राः पाठालयं·········च।

४. विद्यालय से अवकाश प्राप्त कर विद्यार्थी शाम का समय कैसे व्यतीत करते हैं?

५. माता-पिता को अपने बालकों को कैसी शिक्षा देनी चाहिए?

६. सुयोग्य छात्रों को कुमार-सभाएँ बनाकर उनमें कैसे विषयों पर विचार करना चाहिए?

वणिक्पुत्र-कथा

अस्ति कस्मिंश्चदधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः। स च द्रव्यक्षयाद् देशान्तरगमनमना व्यचिन्तयत्।

यत्र देशेऽथवा स्थाने भोगान् भुक्त्वा स्ववीर्य्यतः ।
तस्मिन् विभवहीनो यो वसेत् स पुरुषाधमः ॥१॥

तस्य च गृहे लोहभारघटिता पूर्वपुरुषोपार्जिता तुलाऽऽसीत् । तां च कस्यचिद्वणिजो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः । ततः सुचिरं कालं देशान्तरं भ्रान्त्वा पुनस्तदेव स्वपुरमागत्य तं श्रेष्ठिनमुवाच—भो श्रेष्ठिन् ! दीयतां मे सा निक्षेपतुला ।

स आह—भो नास्ति सा त्वदीया तुला । सा खलु मूषिकैर्भक्षिता ।

जीर्णधन आह—नास्ति दोषस्ते यदि सा मूषिकैर्भक्षितेति । ईदृगेव संसारः । न किञ्चिदत्र शाश्वतमस्ति । परमहं नद्यां स्नानार्थं गच्छामि । तत् त्वमात्मीयं शिशुमेतं मया सह स्नानोपकरणहस्तं प्रेषयेति ।

सोऽपि चौर्य्यभयात् तस्मात् शङ्कितः स्वपुत्रमुवाच—वत्स ! पितृव्योऽयं तव स्नानार्थं नद्यां गच्छति । तद्गम्यतामनेन सार्धं स्नानोपकरणमादायेति ।

अथासौ वणिक् शिशुः स्नानोपकरणमादाय प्रहृष्टमनास्तेनाभ्यागतेन सह प्रस्थितः । तथाऽनुष्ठिते स वणिक् स्नात्वा तं शिशुं नदीगुहायां प्रक्षिप्य तद्द्वारं बृहच्छिलयाऽऽच्छाद्य सत्वरं गृहमागतः । पृष्टश्च तेन वणिजा—

भो अभ्यागत ! कथ्यतां कुत्र मे शिशुर्यस्त्वया सह नदीं गतः ।

स आह—नदीतटात् स श्येनेन हृतः । श्रेष्ठ्याह—मिथ्यावादिन् ! किं क्वचिच्छ्येनो बालं हर्तुं शक्नोति ? तत् समर्पय मे सुतम् अन्यथा राजकुले निवेदयिष्यामि ।

एवं विवदमानौ द्वावपि राजकुलं गतौ । तत्र श्रेष्ठी तारस्वरेण प्रोवाच—भो अब्रह्मण्यम् ! अब्रह्मण्यम् ! मम शिशुरनेन चौरेणापहृतः । अथ धर्म्माधिकारिणस्तमूचुः—भोः समर्प्यतां श्रेष्ठिसुतः । स आह—किं करोमि ? पश्यतो मे नदीतटाच्छ्येनेनापहृतः शिशुः ।

तच्छ्रुत्वा ते प्रोचुः—न सत्यमभिहितं भवता श्येनः शिशुं हर्तुं समर्थो भवति ?

स आह भो भोः श्रूयतां मद्वचः ।

तुलां लोहमयीं देव ! यत्र खादन्ति मूषिकाः ।
गजं तत्र हरेच्छ्येनो दारके कोऽस्ति विस्मयः ॥

ते प्रोचुः—कथमेतत् ।

ततः वणिक्पुत्रः सभ्यानादितः सर्वं वृत्तान्तं निवेदयामास । अथ तैर्विहस्य द्वावपि तौ परस्परं सम्बोध्य तुलाशिशुप्रदानेन सन्तोषितौ ।

अभ्यास

१. सन्धिच्छेद करो—

तुलाऽऽसीत्। ईदृगेव। अथासौ। द्वावपि। सत्यमभिहितम्।

२. वाक्य-पूर्ति करो—

(क) सा खलु मूषिकैः.........

(ख) अहं नद्यां स्नानार्थं........

(ग) यः त्वया सह........

(घ) भो भोः श्रूयताम्.........

३. भुक्त्वा, प्रेषय, हर्तुम्, श्रुत्वा—इनका परिचय देकर वाक्यों में प्रयुक्त करो—

४. जीर्णधन नामक वणिक्पुत्र ने देशान्तर-गमन के समय किसके पास अमानत के रूप में क्या रखा था ?

५. सेठ से अपनी अमानत प्राप्त करने के लिए जीर्णधन ने क्या उपाय किया ?

६. इस कथा से हमें क्या शिक्षा प्राप्त होती है ?

हितोपदेशस्यारम्भः

अस्ति भागीरथीतीरे पाटलिपुत्रनामधेयं नगरम्। तत्र सर्वस्वामिगुणोपेतः सुदर्शनो नाम नरपतिरासीत्। स भूपतिरेकदा केनापि पठ्यमानं श्लोकद्वयं शुश्राव।

अनेकसंशयोच्छेदि, परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रं, यस्य नास्त्यन्ध एव सः ॥१॥

यौवनं धन-सम्पत्तिः प्रभुत्वमविवेकता ।
एकैकमप्यनर्थाय, किमु यत्र चतुष्टयम् ॥२॥

इत्याकर्ण्यात्मनः पुत्राणामनधिगतशास्त्राणां नित्यमुन्मार्गगामिनां शास्त्राननुष्ठानेनोद्विग्नमनाः स राजा चिन्तयामास ।

कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्म्मिकः ।
काणेन चक्षुषा किं वा चक्षुष्पीडैव केवलम् ॥३॥

तत्कथमिदानीमेते मम पुत्रा गुणवन्तः क्रियन्ताम् ॥

माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा ॥४॥

एतच्चिन्तयित्वा स राजा पण्डितसभां कारितवान् ।

राजोवाच—भो भोः पण्डिताः ! श्रूयताम्—अस्ति कश्चिदेवंभूतो विद्वान्, यो मम पुत्राणां नित्यमुन्मार्गगामिनामनधिगतशास्त्राणामिदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः । यतः—

काचः काञ्चनसंसर्गाद् धत्ते मारकतीं द्युतिम् ।
तथा सत्सन्निधानेन मूर्खो याति प्रवीणताम् ॥५॥

अत्रान्तरे विष्णुशर्म्मनामा महापण्डितः सकलनीतिशास्त्रतत्त्वज्ञो बृहस्पतिरिवाब्रवीत्—'देव ! महाकुलसम्भूता एते राजपुत्राः, तन्मया नीतिं ग्राहयितुं शक्यन्ते । यतः—

अस्मिंस्तु निर्गुणं गोत्रे नापत्यमुपजायते ।
आकरे पद्मरागाणां जन्म काचमणेः कुतः ॥६॥

अतोऽहं षण्मासाभ्यन्तरे तव पुत्रान्नीतिशास्त्राभिज्ञान् करिष्यामि ।

राजा सविनयं पुनरुवाच—

कीटोऽपि सुमनःसङ्गादारोहति सतां शिरः ।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥७॥

तदेतेषामस्मत्पुत्राणां नीतिशास्त्रोपदेशाय भवन्तः प्रमाणम्—इत्युक्त्वा तस्य विष्णुशर्म्मणो बहुमानपुरःसरं पुत्रान् समर्पितवान् ।

अथ प्रासादपृष्ठे सुखोपविष्टानां राजपुत्राणां पुरस्तात् प्रस्तावक्रमेण स पण्डितोऽब्रवीत् ।

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥८॥

तद्भवतां विनोदाय काक-कूर्म्मादीनां विचित्रां कथां कथयामि । राजपुत्रैरुक्तम्—आर्य्य ! कथ्यताम् ।

विष्णुशर्म्मोवाच—शृणुत ।

ततः परं मनोहराभिः कथाभिरेव विष्णुशर्म्मणा शिक्षितास्ते राजपुत्राः । स एव हितोपदेशो नाम ग्रन्थः ।

अभ्यास

१. सन्धिच्छेद करो—
भूपतिरेकदा। इत्याकर्ण्यात्मनः। एकश्चन्द्रः। पुनरुवाच। पण्डितोऽब्रवीत्।

२. लिङ्ग, विभक्ति, वचन लिखो—
सर्वस्य। पुत्रेण। तिलेभ्यः। श्रुतिम्। अस्मिन्। महद्भिः। कथाभिः।

३. अधोनिर्दिष्ट पदों का परिचय दो—
हन्ति। चिन्तयित्वा। अब्रवीत्। सुप्रतिष्ठितः। कथ्यताम्।

४. समस्तपदों का विग्रह लिखकर समासों का नाम दो।
सर्वस्वामिगुणोपेतः। उद्विग्नमनाः। पण्डितसभाम्। सविनयम्। महाकुलसम्भूताः।

५. सुदर्शन नामक राजा ने कौन-से दो श्लोक सुने थे ? उनका भाव क्या था ? श्लोक सुनकर राजा चिन्तित क्यों हो गया ?

६. विष्णु शर्म्मा ने किस तरह राजा के मूर्ख पुत्रों को सुशिक्षित किया ?

मित्रलाभस्य संक्षेपः

असाधना वित्तहीना बुद्धिमन्तः सुहृत्तमाः।
साधयन्त्याशु कार्य्याणि काककूर्म्म-मृगाखुवत् ॥१॥

अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः। तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति। अथ

कदाचिदवसन्नायां रात्रावस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धः कृतान्तमिव द्वितीयमायान्तं व्याधमपश्यत् ।

तमवलोक्याचिन्तयत्—'अद्य प्रातरेवानिष्टदर्शनं जातम् । न जाने तत् किमनभिमतं दर्शयिष्यति' इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः । यतः—

शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥२॥

अथ तेन व्याधेन तण्डुलकणान् विकीर्य्य जालं विस्तीर्णम् । स च प्रच्छन्नो भूत्वा स्थितः ।

तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पंस्ताँस्तण्डुलकणानवलोकयामास ।

ततः कपोतराजस्तण्डुलकणलुब्धान् कपोतान् प्रत्याह—कुतोऽत्र निर्जने वने तण्डुलकणानां संभवः । तन्निरूप्यतां तावत् । भद्रमिदं न पश्यामि । नास्माभिरविचारितं कर्म्म कर्त्तव्यम् । यतः—

सुजीर्णमन्नं सुविचक्षणः सुतः,
सुशासिता स्त्री नृपतिः सुसेवितः ।
सुचिन्त्य चोक्तं सुविचार्य्य यत् कृतम् ।
सुदीर्घकालेऽपि न याति विक्रियाम् ॥३॥

एतद् वचनं श्रुत्वा कश्चित्कपोतः सदर्पमाह——आः किमेवमुच्यते ।

वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते ।
सर्वत्रैवं विचारेण भोजनेऽप्यप्रवर्तनम् ॥४॥

एतच्छ्रुत्वा सर्वे कपोतास्तत्रोपविष्टाः ।

अनन्तरं सर्वे जालेन बद्धा बभूवुः । ततो यस्य वचनात्तत्रावलम्बितास्तं सर्वे तिरस्कुर्वन्ति । तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच——नायमस्य दोषः ।

विपत्काले विस्मयः कापुरुषलक्षणम् । तदत्र धैर्य्यमवलम्ब्य प्रतिकारश्चिन्त्यताम् । इदानीमप्येवं क्रियताम्–सर्वैरेकचित्तीभूय जालमादायोड्डीयताम् । यतः—

अल्पानामपि वस्तूनां संहतिः कार्य्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥५॥

इति विचिन्त्य पक्षिणः सर्वे जालमादायोत्पतिताः । अनन्तरं स व्याधः सुदूराज्जालापहारकांस्तानवलोक्य पश्चाद्धावन्नचिन्तयत् ।

संहतास्तु हरन्तीमे जालं मम विहङ्गमाः ।
यदा तु निपतिष्यन्ति वशमेष्यन्ति मे तदा ॥६॥

ततस्तेषु चक्षुर्विषयातिक्रान्तेषु पक्षिषु स व्याधो निवृत्तः । अथ लुब्धकं निवृत्तं दृष्ट्वा कपोता ऊचुः—

किमिदानीं कर्त्तुमुचितम्? चित्रग्रीव उवाच—अस्माकं मित्रं हिरण्यको नाम मूषिकराजो गण्डकीतीरे चित्रवने निवसति। सोऽस्माकं पाशांश्छेत्स्यति।

इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः।

हिरण्यकश्च सर्वदापायशङ्कया शतद्वारं विवरं कृत्वा निवसति।

ततो हिरण्यकः कपोतावपातभयाच्चकितस्तूष्णीं स्थितः। चित्रग्रीव उवाच—'सखे हिरण्यक! किमस्मान्न संभाषसे'।

ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय ससम्भ्रमं बहिर्निःसृत्याब्रवीत्।

आः पुण्यवानस्मि। प्रियसुहृन्मे चित्रग्रीवः समायातः।

यस्य मित्रेण संभाषा यस्य मित्रेण संस्थितिः।
यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान् ॥७॥

पाशबद्धांश्चैतान् दृष्ट्वा सविस्मयः क्षणं स्थित्वोवाच, सखे! किमेतत्? चित्रग्रीवोऽवदत्—सखे! अस्माकं प्राक्तनजन्मकर्मणः फलमेतत्।

रोगशोकपरिताप-बन्धन-व्यसनानि च।
आत्मापराधवृक्षाणां फलान्येतानि देहिनाम् ॥८॥

एतच्छ्रुत्वा हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति। चित्रग्रीव उवाच—'मित्र ! मामैवम्। अस्मदाश्रितानामेषां तावत्पाशांश्छिन्धि। तदा मम पाशं पश्चाच्छेत्स्यसि'। हिरण्यकोऽप्याह—'अहमल्पशक्तिः। दन्ताश्च मे कोमलाः, तदेतेषां पाशांश्छेत्तुं कथं समर्थः? तद् यावन्मे दन्ता न त्रुट्यन्ति, तावत्तव पाशं छिनद्मि। तदनन्तरमेषामपि बन्धनं यावच्छक्यं छेत्स्यामि।'

चित्रग्रीव उवाच—अस्त्वेवम्। तथापि यथाशक्त्येतेषां बन्धनं खण्डय।

हिरण्यकेनोक्तं—आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिविदां संमतम्। यतः—

आपदर्थं धनं रक्षेद्दारान् रक्षेद्धनैरपि।
आत्मानं सततं रक्षेद् दारैरपि धनैरपि ॥९॥

चित्रग्रीव उवाच—सखे ! नीतिस्तावदीदृश्येव। किन्त्वहमस्मदाश्रितानां दुःखं सोढुं सर्वथाऽसमर्थः। तेनेदं ब्रवीमि। यतः—

धनानि जीवितञ्चैव परार्थे प्राज्ञ उत्सृजेत्।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥१०॥

इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन्नब्रवीत्—साधु मित्र साधु ! अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि

प्रभुत्वं त्वयि युज्यते । एवमुक्त्वा तेन सर्वेषां बन्धनानि छिन्नानि । ततो हिरण्यकः सर्वान् सादरं सम्पूज्याह— सखे चित्रग्रीव ! सर्वथात्र जालबन्धनविधौ दोषमाशङ्क्यात्मन्यवज्ञा न कर्त्तव्या । यतः—

योऽधिकाद् योजनशतात् पश्यतीहामिषं खगः ।
स एव प्राप्तकालस्तु पाशबन्धं न पश्यति ॥११॥

इति प्रबोध्यातिथ्यं कृत्वाऽऽलिङ्ग्य च चित्रग्रीवस्तेन सम्प्रेषितो यथेष्टदेशान् सपरिवारो ययौ । हिरण्यकोऽपि स्वविवरं प्रविष्टः ।

अथ लघुपतनकनामा काकः सर्ववृत्तान्तदर्शी साश्चर्यमिदमाह—अहो हिरण्यक ! श्लाघ्योऽसि । अतोऽहमपि त्वया सह मैत्रीमिच्छामि । अतो मां मैत्र्येणानुग्रहीतुमर्हसि ।

एतच्छ्रुत्वा हिरण्यकोऽपि विवराभ्यन्तरादाह— 'कस्त्वम् ?' स ब्रूते—लघुपतनकनामा वायसोऽहम् । हिरण्यको विहस्याह—का त्वया सह मम मैत्री ? यतः—

यद् येन युज्यते लोके बुधस्तत्तेन योजयेत् ।
अहमन्नं भवान् भोक्ता कथं प्रीतिर्भविष्यति ॥१२॥

काक आह—

भक्षितेनापि भवता नाहारो मम पुष्कलः ।
त्वयि जीवति जीवामि चित्रग्रीव इवानघ ! ॥१३॥

हिरण्यको ब्रूते—चपलस्त्वम् । चपलेन सह स्नेहः सर्वथा न कर्त्तव्यः । किंचान्यत्—शत्रुपक्षो भवानस्माकम् । शत्रुणा च सन्धिर्नैव करणीयः ।

उक्तञ्चैतत्—

शत्रुणा न हि संदध्यात् सुश्लिष्टेनापि सन्धिना ।
सुतप्तमपि पानीयं शमयत्येव पावकम् ॥१४॥

लघुपतनको ब्रूते—श्रुतं मया सर्वम् । तथापि मम चेतावान् सङ्कल्पः—त्वया सह सौहार्दमवश्यं करणीयम् इति । नोचेदनाहारेणात्मानं तव द्वारि व्यापादयिष्यामि ।

शुचित्वं त्यागिता शौर्यं सामान्यं सुखदुःखयोः ।
दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्गुणाः ॥१५॥

एतैर्गुणैरुपेतो भवदन्यो मया कः सुहृत्प्राप्तव्यः । इत्यादि तद्वचनमाकर्ण्य हिरण्यको बहिर्निःसृत्याह—आप्यायितोऽहं भवताऽनेन वचनामृतेन ।

रहस्यभेदो याच्ञा च नैष्ठुर्य्यं चलचित्तता ।
क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणम् ॥१६॥

अनेन वचनक्रमेण तदेकदूषणमपि त्वयि न लक्ष्यते ।

यतः—

मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम् ।
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ॥१७॥

तद् भवतु भवतोऽभिमतमेव । इत्युक्त्वा हिरण्यको मैत्र्यं विधाय भोजनविशेषैर्वायसं संतोष्य विवरं प्रविष्टः । वायसोऽपि स्वस्थानं गतः ।

ततः प्रभृति प्रत्यहं तयोरन्योन्याहारप्रदानेन कुशलप्रश्नैर्विस्रम्भालापैश्च कालोऽतिवर्तते ।

एकदा लघुपतनको हिरण्यकमाह—सखे ! कष्टतरलभ्याहारमिदं स्थानम् । तदेतत् परित्यज्य स्थानान्तरं गन्तुमिच्छामि ।

हिरण्यको ब्रूते—मित्र ! क्व गन्तव्यम् । तथा चोक्तम्—

स्थानभ्रष्टा न शोभन्ते दन्ताः केशाः नखाः नराः ।
इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत् ॥१८॥

काको ब्रूते—मित्र ! कापुरुषस्य वचनमेतत् । यतः—

स्थानमुत्सृज्य गच्छन्ति सिंहाः सत्पुरुषा गजाः ।
तत्रैव निधनं यान्ति काकाः कापुरुषा मृगाः ॥१९॥

हिरण्यकोऽब्रवीत्—

चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ।
नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥२०॥

वायसो ब्रूते—अस्ति सुनिरूपितं स्थानम् ।

हिरण्यकोऽवदत्—किं तत् ?

वायसो ब्रूते—अस्ति दण्डकारण्ये कर्पूरगौराभिधानं सरः । तत्र चिरकालोपार्जितः प्रियसुहृन्मे मन्थराभिधानः कच्छपो धार्म्मिकः प्रतिवसति । स च भोजनविशेषैर्मां संवर्धयिष्यति । हिरण्यकोऽप्याह—तत् किमत्रावस्थाय मया कर्त्तव्यम् ? यतः—

तत्र मित्र न वस्तव्यं यत्र नास्ति चतुष्टयम् ।
ऋणदाता च वैद्यश्च श्रोत्रियः सजला नदी ॥२१॥

ततो मामपि तत्र नय ।

अथ वायसस्तेन मित्रेण सह विचित्रकथालापैः सुखेन तस्य सरसः समीपं ययौ ।

ततो मन्थरो दूरादवलोक्य लघुपतनकस्य यथोचितमातिथ्यं विधाय मूषिकस्यातिथिसत्कारं चकार ।

वायसोऽवदत्—सखे मन्थर ! सविशेषपूजामस्मै विधेहि । यतोऽयं पुण्यकर्म्मणां धुरीणः कारुण्यरत्नाकरो हिरण्यकनामा मूषिकराजः । एतस्य गुणस्तुतिं जिह्वासहस्रद्वयेनापि सर्पराजः कदाचित् कथयितुं समर्थः स्यात् ।

इत्युक्त्वा चित्रग्रीवोपाख्यानं वर्णितवान् ।

मन्थरः सादरं हिरण्यकं संपूज्याह---भद्र ! आत्मनो निर्जनवनागमनकारणमाख्यातुमर्हसि ।

हिरण्यकोऽवदत्--कथयामि । श्रूयताम्—अस्ति चम्पकाभिधानायां नगर्यां परिव्राजकावसथः । तत्र चूडाकर्णो नाम परिव्राट् प्रतिवसति । स भोजनावशिष्ट-भिक्षान्नसहितं भिक्षापात्रं नागदन्तकेऽवस्थाप्य स्वपिति । अहञ्च तदन्नमुत्प्लुत्य भक्षयामि । अनन्तरं तस्य प्रियसुहृद् वीणाकर्णो नाम परिव्राजकः समायातः ।

तेन सह कथा प्रसङ्गावस्थितो मम त्रासार्थं जर्जर-वंशखण्डेन चूडाकर्णो भूमिमताडयत् ।

वीणाकर्ण उवाच--सखे ! किमिति मम कथा-विरक्तोऽन्यासक्तो भवान् ।

चूडाकर्णेनोक्तं--"मित्र नाहं विरक्तः । किन्तु पश्यायं मूषिको ममापकारी सदा पात्रस्थं भिक्षान्नमुत्प्लुत्य भक्षयति ।

वीणाकर्णो नागदन्तकं विलोक्याह—"कथं मूषिकः स्वल्पबलोऽप्येतावद् दूरमुत्पतति ? तदत्र केनापि कारणेन भवितव्यम् । क्षणं विचिन्त्य परिव्राजकेनोक्तं—कारणं चात्र बाहुल्याद् धनमेव भविष्यति ।

ततः खनित्रमादाय तेन परिव्राजकेन विवरं खनित्वा चिरसञ्चितं मम धनं गृहीतम्। ततः प्रभृति निजशक्तिहीनः सत्त्वोत्साहरहितः स्वाहारमप्युत्पादयितुमक्षमः सत्रासं मन्दं मन्दमुपसर्पंश्चूडाकर्णेनाहमवलोकितः। ततस्तेनोक्तम्—

धनेन बलवाँल्लोके धनाद् भवति पण्डितः।
पश्यैनं मूषिकं पापं स्वजातिसमतां गतम् ॥२२॥

एतदाकर्ण्य मयालोचितम्—ममात्रावस्थानमयुक्तमिदानीम्। यच्चान्यस्मा एतद् वृत्तान्तकथनं तदप्यनुचितम्। यतः—

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च।
वञ्चनं चापमानञ्च मतिमान्न प्रकाशयेत् ॥२३॥

यच्चात्रैव याञ्चया जीवनं तदतीव गर्हितम्।

वरं विभवहीनेन प्राणैः सन्तर्पितोऽनलः।
नोपचारपरिभ्रष्टः कृपणः प्रार्थितो जनः ॥२४॥

इति विमृश्य तत्किमहं परपिण्डेनात्मानं पोषयामि। कष्टं भोः! तदपि द्वितीयं मृत्युद्वारम्।

रोगी चिरप्रवासी परान्नभोजी परावसथशायी।
यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः ॥२५॥

इत्यालोच्यापि लोभात् पुनरप्यर्थं ग्रहीतुं ग्रहमकरवम्। तथा चोक्तम्—

लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।
तृषार्तो दुःखमाप्नोति परत्रेह च मानवः ॥२६॥

ततोऽहं मन्दं मन्दमुपसर्पंस्तेन वीणाकर्णेन जर्जरवंश-खण्डेन ताडितः । तदाहमचिन्तयम्—

सर्वाः सम्पत्तयस्तस्य सन्तुष्टं यस्य मानसम् ।
उपानद्-गूढपादस्य ननु चर्मावृतेव भूः ॥२७॥

तदत्रावस्थोचितकार्य्यपरिच्छेदः श्रेयान् । इत्यालोच्याहं निर्जनवनमागतः ।

ततोऽस्मत्पुण्योदयेनानेन मित्रेणाहं स्नेहानुवृत्त्यानुगृहीतः । अधुना च पुण्यपरम्परया भवदाश्रयः स्वर्ग एव मया प्राप्तः । यतः—

संसारविषवृक्षस्य द्वे एव रसवत्फले ।
काव्यामृतरसास्वादः सङ्गमः सुजनैः सह ॥२८॥

मन्थर उवाच—युष्माभिरतिसञ्चयः कृतः । तस्यायं दोषः । तदिदानीं यातु । किमतिक्रान्तोपवर्णनेन । सखे ! सर्वदा त्वया सोत्साहेन भवितव्यम् । यतः—

शास्त्राण्यधीत्यापि भवन्ति मूर्खाः,
यस्तु क्रियावान् पुरुषः स विद्वान् ।
सुचिन्तितं चौषधमातुराणाम्,
न नाममात्रेण करोत्यरोगम् ॥२९॥

तदत्र सखे ! दशाविशेषे शान्तिः करणीया । एतदप्यतिकष्टं त्वया न मन्तव्यम् । किं बहुना, मयैव सहात्र कालो नीयताम् ।

इति श्रुत्वा लघुपतनको ब्रूते—धन्योऽसि मन्थर, सर्वथा श्लाघ्यगुणोऽसि ।

तदेवं ते स्वेच्छाहारविहारं कुर्वाणाः सन्तुष्टाः सुखं निवसन्ति ।

अथ कदाचिच्चित्राङ्गनामा मृगः केनापि त्रासितस्तत्रागत्य मिलितः ।

ततस्तत्पश्चादायान्तं भयहेतुमालोक्य मन्थरो जलं प्रविष्टः । मूषिकश्च विवरं गतः ।

काकोऽप्युड्डीय वृक्षाग्रमारूढः ।

ततो लघुपतनकेन सुदूरं निरूप्य "भयहेतुर्न कोऽप्यायाति" इत्यालोचितम् ।

पश्चात्तद्वचनादागत्य पुनः सर्वे मिलित्वा तत्रैवोपविष्टाः ।

मन्थरेणोक्तम्—भद्र मृग ! स्वागतं ते । स्वेच्छयोदकाद्याहारोऽनुभूयताम् । अत्रावस्थानेन वनमिदं सनाथीक्रियताम् ।

चित्राङ्गो ब्रूते—लुब्धकत्रासितोऽहं भवतां शरणमागतो भवद्भिः सह सख्यमिच्छामि ।

हिरण्यकोऽवदत्—मित्रत्वं तावदस्माभिः सहायत्नेन निष्पन्नमेव भवतः । तद्भवता स्वगृहनिर्विशेषं स्थीयताम् ।

तच्छ्रुत्वा मृगः सानन्दो भूत्वा स्वेच्छाहारं कृत्वा पानीयं पीत्वा जलासन्नतरुच्छायायामुपविष्टः ।

अथ मन्थरेणोक्तं—सखे मृग ! एतस्मिन्निर्जने वने केन त्रासितोऽसि । कदाचित् किं व्याधाः सञ्चरन्ति ?

मृगेणोक्तम्—अस्ति कलिङ्गविषये रुक्माङ्गदो नाम नरपतिः । स च दिग्विजय-व्यापारक्रमेणागत्य चन्द्रभागा-नदीतीरे समावासित-कटको वर्तते । प्रातश्च तेनात्रागत्य कर्पूर-सरःसमीपे भवितव्यम्, इति व्याधानां मुखात् किंवदन्ती श्रूयते । तदत्राऽपि प्रातरवस्थानं भयहेतुकम् इत्यालोच्य यथावसरं कार्य्यमारभ्यताम् ।

तच्छ्रुत्वा कूर्म्मः सभयमाह—जलाशयान्तरं गच्छाम ।

काकमृगावप्युक्तवन्तौ—एवमस्तु ।

ततो हिरण्यको विमृश्याह—जलाशयान्तरे प्राप्ते मन्थरस्य कुशलम्, स्थले गच्छतः कः प्रतिकारः ? यतः—

अम्भांसि जलजन्तूनां, दुर्गं दुर्गनिवासिनाम् ।
स्वभूमिः श्वापदादीनां, राज्ञां मन्त्री परं बलम् ॥२०॥

तद्धितवचनमवधार्य्य महता भयेन विमुग्ध इव तं जलाशयमुत्सृज्य मन्थरश्चलितः ।

तेऽपि हिरण्यकादयः स्नेहादनिष्टं शङ्कमाना मन्थरमनुगच्छन्ति ।

ततः स्थले गच्छन् केनापि व्याधेन काननं पर्य्यटता मन्थरः प्राप्तः ।

प्राप्य च तं गृहीत्वोत्थाप्य धनुषि बद्ध्वा व्याधो भ्रमणक्लेशात् क्षुत्पिपासाकुलः स्वगृहाभिमुखश्चलितः । अथ मृगवायसमूषिकाः परं विषादं गच्छन्तस्तमनुजग्मुः ।

ततो हिरण्यको विलपति—

एकस्य दुःखस्य न यावदन्तं,
गच्छाम्यहं पारमिवार्णवस्य ।
तावद् द्वितीयं समुपस्थितं मे,
छिद्रेष्वनर्था बहुलीभवन्ति ॥२१॥

एवं बहु विलप्य हिरण्यकश्चित्राङ्ग-लघुपतनकावाह—यावदयं व्याधो वनान्न निःसरति तावन्मन्थरं मोचयितुं यत्नः क्रियताम् ।

तावूचतुः—सत्वरं कार्य्यमुच्यताम् ।

हिरण्यको ब्रूते—"चित्राङ्गो जलसमीपं गत्वा मृतमिवात्मानं दर्शयतु । काकश्च तस्योपरि स्थित्वा चञ्च्वा किमपि विलिखतु । नूनमनेन लुब्धकेन तत्र कच्छपं परित्यज्य मृगमांसार्थिना सत्वरं गन्तव्यम् । ततोऽहं मन्थरस्य बन्धनं छेत्स्यामि । सन्निहिते लुब्धके भवद्भ्यां पलायितव्यम् ।

चित्राङ्ग-लघुपतनकाभ्यां शीघ्रं गत्वा तथानुष्ठिते सति स व्याधः श्रान्तः पानीयं पीत्वा तरोरधस्तादुपविष्टस्तथाविधं मृगमपश्यत् । ततस्तत्र कच्छपं निधाय कर्तरिकामादाय प्रहृष्टमना मृगयुर्मृगान्तिकं चलितः ।

तत्रान्तरे हिरण्यकेनागत्य मन्थरस्य बन्धनं छिन्नम् ।

स कूर्म्मः सत्वरं जलाशयं प्रविवेश । स मृग आसन्नं तं व्याधं विलोक्योत्थाय पलायितः । प्रत्यावृत्य लुब्धको यावत्तरुतलमायाति तावत्कूर्म्ममपश्यन्नचिन्तयत्—उचितमेवैतन्ममासमीक्ष्यकारिणः । यतः—

यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति, अध्रुवं नष्टमेव हि ॥३२॥

ततोऽसौ स्वकर्म्मवशान्निराशः कटकं प्रविष्टः। मन्थरादयश्च सर्वे विमुक्तापदः स्वस्वस्थानं गत्वा यथासुखमास्थिताः।

अभ्यास

१. सन्धिच्छेद करो—
   साधयन्त्याशु। प्रत्याह। नायमस्य। ततस्तत्र। काकश्च।
२. समस्तपदों का विग्रह लिखकर समासों का नाम लिखो—
   अल्पशक्तिः। सपरिवारः। कारुण्यरत्नाकरः। श्लाघ्यगुणः। विमुक्तापदः।
३. चित्रग्रीव वन्धन में कैसे पड़ गया था? उसने वन्धन किस की सहायता से कटवाए?
४. हिरण्यक लघुपतनक से मित्रता क्यों नहीं करना चाहता था? दोनों के परस्पर वार्तालाप का सार लिखो।
५. मन्थर कौन था? किस तरह उसे वन्धन से मुक्त किया गया?
६. मित्रलाभ की कथा से क्या शिक्षा प्राप्त होती है?

सत्सङ्ग-महिमा

कीटोऽपि सुमनःसङ्गादारोहति सतां शिरः।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः॥१॥
यथोदयगिरेः द्रव्यं सन्निकर्षेण दीप्यते।
तथा सत्सन्निधानेन हीनवर्णोऽपि दीप्यते॥२॥

हीयते हि मतिस्तात ! हीनैः सह समागमात् ।
समैश्च समतामेति विशिष्टैश्च विशिष्टताम् ॥३॥
पापं गङ्गा शशी तापं, दैन्यं कल्पतरुस्तथा ।
पापं तापञ्च दैन्यञ्च, हन्ति सज्जनसङ्गमः ॥४॥

उद्योग-प्रशंसा

उद्यमेन हि सिध्यन्ति कार्य्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥१॥
काकतालीयवत्प्राप्तं, दृष्ट्वापि निधिमग्रतः ।
न स्वयं दैवमादत्ते, पुरुषार्थमपेक्षते ॥२॥
यथा ह्येकेन चक्रेण, न रथस्य गतिर्भवेत् ।
एवं पुरुषकारेण, विना दैवं न सिध्यति ॥३॥
उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या,
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥४॥

अभ्यास

१. सन्धिच्छेद करो—
कीटोऽपि । मतिस्तात । तापञ्च । कोऽत्र । ह्येकेन
२. अधोनिर्दिष्ट पदों का परिचय दो—
दीप्यते । सिध्यन्ति । भवेत् । वदन्ति । निहत्य

३. लिङ्ग, विभक्ति, वचन लिखकर अर्थ भी साथ दो—
सताम् । महद्भिः । रथस्य । आत्मशक्त्या । उद्योगिनम् ।
४. उदाहरणों द्वारा प्रमाणित करो कि सत्सङ्ग मनुष्य को उन्नत करता है।
५. उद्योग के लाभों का संक्षेप से वर्णन करो।
६. बिना तथा सह के योग में कौन-सी विभक्ति प्रयुक्त होती है?

सूक्तयः

स जातो येन जातेन याति वंशः समुन्नतिम् ।
परिवर्तिनि संसारे मृतः को वा न जायते ॥१॥

धर्मार्थ-काममोक्षाणां यस्यैकोऽपि न विद्यते ।
अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥२॥

गुणा गुणज्ञेषु गुणा भवन्ति,
ते निर्गुणं प्राप्य भवन्ति दोषाः ।
आस्वाद्यतोयाः प्रभवन्ति नद्यः,
समुद्रमासाद्य भवन्त्यपेयाः ॥३॥

इज्याऽध्ययनदानानि तपः सत्यं धृतिः क्षमा ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥४॥

मातृवत्परदारेषु, परद्रव्येषु लोष्टवत् ।
आत्मवत् सर्वभूतेषु, यः पश्यति स पण्डितः ॥५॥

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं विदुः ॥६॥
सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः ।
अतीत्य हि गुणान् सर्वान् स्वभावो मूर्ध्नि वर्तते ॥७॥
शरीरस्य गुणानां च दूरमत्यन्तमन्तरम् ।
शरीरं क्षणविध्वंसि, कल्पान्तस्थायिनो गुणाः ॥८॥
एक एव सुहृद्धर्म्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्वमन्यत्तु गच्छति ॥९॥
दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥१०॥
कुसुमस्तवकस्येव द्वे वृत्ती तु मनस्विनः ।
सर्वेषां मूर्ध्नि वा तिष्ठेद् विशीर्य्येत वनेऽथवा ॥११॥

अभ्यास

१. लिङ्ग, विभक्ति, वचन लिखो—
येन । तस्य । अनुपकारिणे । विद्यया । मनस्विनः ।
२. सन्धिच्छेद करो—
यस्यैकोऽपि । समुद्रमासाद्य । भवन्त्यपेयाः । किमसौ ।
३. धर्म्म के कौन से आठ मार्ग हैं ?
४. पण्डित किसे कहते हैं ?
५. अधोनिर्दिष्ट पदों का परिचय दो—
दातव्यम् । दीयते । जायते । अलंकृतः । अतीत्य ।

सुमति-सचिव-कथा

कस्मिंश्चिद्देशे शूरसेनो नाम राजाऽऽसीत् । स सुतनिर्विशेषं प्रजाः पालयन् सुखेन कालं निनाय । सुमतिर्नाम तस्य मन्त्री । नरपतिस्तस्मिन्नत्यर्थं प्रीतिमानासीत् । तस्य मन्त्रिणः भगवति परमा प्रीतिर्बभूव । "जगतीह नक्तन्दिवं यत् किञ्चित् घटते तत् सर्वमेव शुभाय" इत्येवं तस्य बुद्धिरासीत् । शुभं वाप्यशुभं किञ्चित् धीरस्यास्य चित्तं विकलयितुं न प्रभवति स्म । विधात्रा विहितं सर्वं स कल्याणाय एव मन्यते स्म । "भगवता विधात्रा यदेव विधीयते तत् सर्वमेव शुभाय" इति सः सर्वदैवाकथयत् ।

नृपतिरपि तस्य मुखादनिशम् एवमाकर्णयन् कदाचिदचिन्तयत्—"अहो ! किमप्येनं वीतधैर्यं कर्तुं नालम् । भवतु तावत् अहमस्य धैर्यं परीक्षिष्ये" ।

अथ दैवेन नृपतेरङ्गुल्यां स्फोटकः सञ्जातः । तेन सोऽत्यर्थं क्लिश्यमानो 'मन्त्रिणमेवं विज्ञापय' इति आदिश्य कञ्चित् दूतं प्रेरितवान् ।

सचिवस्तस्य मुखतः प्रवृत्तिम् एतामासाद्य स्वभावधीरतया "भगवता विधात्रा यदेव विधीयते तदेव शुभाय" इति प्रतिभाषणं प्रेषयामास ।

नृपतिस्तदवगमात् कोपस्फुटितलोचनोऽवदत्—

"अहो धिगिमं जाल्मम् । यत् क्लिष्टमपि मां नानुकम्पते । तस्येदमौदासीन्यं न मया कदापि सोढव्यम् ।"

अथ कदाचित् पीडयास्याङ्गुलिः स्खलिता बभूव । राजा च भूयसा क्लेशेन संशयितजीवितोऽभवत् ।

"मन्त्रिणं ज्ञापय" इत्यादिश्य भूयः कञ्चित् दूतं प्रेरितवांश्च । सचिवोऽपि निशम्यैतत् "भगवता विधात्रा यदेव विधीयते तदेव शुभाय" इति प्रतिवचनं ददौ । नृपतिरपि श्रुत्वैतत् अचिन्तयत्—"स्वस्थश्चेत् नूनमेनं हनिष्यामि ।"

अथ दिष्ट्या स रोगात् निर्मुक्तो बभूव । गतेषु दिनेषु असौ सद्यः समेत्य प्रजानामानन्दं वर्धयामास । सचिवोऽपि राजसकाशमागत्य यथाविधि तमभिननन्द । नृपतिस्तु मधुरवाचा तं पुनः न सम्भाषयामास ।

अथैकदा राजा मृगयायै यातुकामो मन्त्रिणं प्राह—"भो मन्त्रिन् ! यथारीति मृगयागमनोद्योगं विधेहि" ।

सोऽपि च 'देवपादा यथाज्ञापयन्ति' इत्युक्त्वा सर्वमेवानुष्ठितवान् ।

ततः स नृपतिरश्वमारुह्य बहुभिर्लोकैरनुगम्यमानो मन्त्रिणा सह प्रतस्थे । निविडकाननाभ्यन्तरमासाद्य अनुचरान् सर्वानादिदेश—"युष्माकं दूरमनुसरणेनालम् ।

मन्त्रिणानुगतोऽहं दूरतर-वनमध्यमवगाहिष्ये । भवन्तश्च सायं यावत् मे प्रत्यावर्तनमपेक्ष्य गृहं प्रतिनिवर्तन्ताम् ।"

ततो राजा मन्त्री च अश्वमारुह्य द्रुतं गम्भीरवनमध्यं प्रविवेश ।

सहसा कूपमेकमालोक्य नृपतिरचिन्तयत्—'अवसरोऽयं सम्यगस्माकं सङ्कल्पसिद्धेः । तृषाव्याजं अवलम्ब्य जलानयनार्थं मन्त्रिणमादिशामि । कूपसन्निहितं चैनं कूपमध्ये पातयामि' इत्यवधार्य्य मन्त्रिणं प्राह—"सुमते ! महती मे पिपासा जाता । नाहं दूरतरं गन्तुं शक्नोमि । कूपोऽयमारात् दृश्यते । पश्य, तत्र जलमस्ति न वा" ।

सचिवो नृपस्याज्ञया कूपसमीपं गत्वा नततुण्डो यावत् जलं निरीक्षते तावद् राजा झटिति पृष्ठतस्तं कूपे चिक्षेप ।

सचिवोऽपि पतन्नेव "भगवता विधात्रा यदेव विधीयते तदेव शुभाय" इत्युक्त्वा कूपमध्ये पपात ।

राजाऽपि विवृतवदनस्तूर्णं ततः प्रतस्थे, तदा सन्ध्या समागताऽऽसीत् । भगवान् काश्यपेयः स्वीयमयूखान् संहृत्य अस्ताचल-शिखरारोहणोन्मुखो बभूव । दिनकर-विरहेण सन्तापितचित्ता धरणी तमोवसनं पिनह्येव वयसां रुतव्याजेन मानसीं व्यथां प्रकटयामास ।

श्वापदाः सर्वे प्रहृष्टमनसो विवरात् निष्क्रम्य समन्तात् परिधावितुमारेभिरे।

नृपतिः कथञ्चित् वनपथात् बहिरायातुमसमर्थः सन्निहितं वृक्षमेकमारुह्य अवतस्थे। अश्वोऽपि तदधस्तात्तस्थौ।

अथ निशीथसमयः सम्भूतः। सहसा वनभागं प्रकम्पयन्निव तत्रैव महान् कोलाहलः समुत्थितः।

नरपतिस्तु 'कश्चिदतर्कितो विपत्पात आपतितोऽयम्' इति मत्वा यावत् पश्यति तावदारात् समागच्छतो बहून् लोकानवलोकयामास।

तेऽपि शनैः शनैः वृक्षाभ्याशमेत्य सज्जिततुरङ्गमेकमालोक्य परस्परं कथयामासुः—"सिद्धमेव साम्प्रतमस्माकमभिलषितम् इति। तुरङ्गमेन मानवसमागमोऽत्र इति संसूच्यते। इदानीमेनमनुसन्धाय राजसकाशं नेष्यामः। अस्माकं नृपतिरपि श्वः प्रातश्चामुण्डायै बलिमुपहारीकृत्य सिद्धकामो भविष्यति।"

इत्याकर्ण्य नृपतिर्वृक्षारूढः संज्ञाहीन इव पत्रान्तरालमध्यवर्ती तस्थौ।

सहसा तेषामेकतमो "वृक्षेऽस्मिन् मानवो दृश्यते, मानवो दृश्यते" इत्युच्चैरपरान् ज्ञापयामास।

तत्कालमेव कश्चिद् वृक्षमारुह्य राजानं बद्ध्वा वृक्षात् तस्मादवतारयामास।

अथैनमश्वमारोप्य विजयगीतिं गायन्तः सर्वे यथागतं चलिताः।

राजा च "आत्मकर्म्मफलानुरूपमेतद्" इति विज्ञाय स्थाणुवत् तस्थौ।

ते च स्वं नृपतिमुपागम्य "आसादितोऽयं बलिः" इति निवेदयामासुः।

राजा च "एनं कारागृहे स्थापय" इति आदिश्य चामुण्डामन्दिरं ययौ।

अथ क्रमेण निशावसानमभूत्। ढक्का-दुन्दुभि-पटह-निनादैर्नृपभवनमचिरेण पूर्णमभवत्। समीरणैः समन्ततः सञ्चाल्यमानैः रक्तध्वजैः उपशोभितं देवीमन्दिरं बभूव। राजा च परिधृतरक्तवसनो रक्तचन्दनानुलिप्तो रक्तमाल्योपशोभितो "मातश्चामुण्डे! प्रसीद प्रसीद बलिमिमं गृहाण" इति कथयन् यावत् देव्याः पुरतो बन्दिनं राजानं संस्थाप्य तस्यावयवं निरीक्षाञ्चक्रे तावत् तमङ्गुष्ठेन हीनमालोक्य "आः पाप! किमिदम्, हीनाङ्गुष्ठं नरमिमं कथं बलिरूपेण चामुण्डायै दास्यामि" इति कथयित्वा तं दूरीचकार। पूर्णावयवमन्यमेकमानेतुमादिदेश।

नृपतिरयं दिष्ट्या प्राणान् प्राप्य पलायाञ्चक्रे। अथ स काननमासाद्य चिन्तयामास—"अहो! यदेव सचिवेनोक्तं सत्यमेव तावत् सर्वम्। 'भगवता विधात्रा यदेव विधीयते तदेव शुभाय' इति मयाद्य सम्यक् परीक्षितम्। अङ्गुष्ठहीनं नूनमद्य स मां नावधीत्।

अहो, कुत्र स मे मन्त्री, कुत्र स मे भगवत्परायणो धार्म्मिककुलशेखरो विवेकचूडामणिर्ममैकबन्धुः? धिङ् मां यदहं कारणं विना तं हतवान्। किमद्यापि स जीवति? भवतु गत्वा तत्र द्रक्ष्यामि।"

तावदवधार्य्य स लघुपदं तत् कूपसन्निधावागत्य, "धार्म्मिकप्रवर! सुमते! ममैकप्रियबन्धो! सचिवराज! किमद्यापि जीवसि? देहि मे प्रतिवचनम्" इत्युच्चैस्तमाजुहाव।

नृपतेर्वचः श्रुत्वा मन्त्री कूपादतीवार्तस्वरेण प्रोवाच—"महाराज! मृतकल्पोऽत्र तिष्ठामि, यदीच्छसि मामुद्धर"। ततो नृपतिस्तूर्णं तं कूपादुज्जहार। बहुशश्चात्मदोषं स्वीकृत्य क्षमस्वेति भूयो भूयश्चानुनीय मन्त्रिणं प्रसादयामास।

मन्त्रिणोक्तम्—"महाराज! किमिदम्। किमेवं कथयसि। किमापतितं देवपादानाम्। कथमीदृशीमवस्था-

मापन्नोऽसि, कथं हि ते दृष्टिरियं सकातरा वर्तते ?"

ततो राजा प्राह—"मन्त्रिन् ! सत्यमुक्तं भवता । 'भगवता विधात्रा यदेव विधीयते तदेव शुभाय' इत्यत्र नास्ति मे कश्चित् सन्देहः" इत्युक्त्वा तस्यादितो यत् वृत्तं तत् सर्वं कथयामास ।

तच्छ्रुत्वा मन्त्री किञ्चित् विहस्य प्रोवाच—"महाराज ! ममापि कूपे निक्षेपो भगवता अनुमोदित एव । हीनाङ्गस्य भवतो मुक्तिश्चेदपि त्वत्सङ्गिनः पूर्णावयवस्य ममैव परित्राणं न कथमप्यभविष्यत् । अतो ज्ञायतामेतत् देवपादैर्यद् भगवता विधात्रा विधीयते तदेव शुभाय ।"

ततस्तौ परस्परं प्रीतौ स्वराज्यं प्रतिनिवृत्तौ ।

अभ्यास

१. अधोनिर्दिष्ट रूपों के शब्द, विभक्ति, वचन लिख कर अर्थ लिखो ।
   सुखेन । मन्त्रिणः । अंगुल्याम् । तस्य । पीडया । मृगयायै । भगवता । विधात्रा । कूपे । तौ ।
२. सन्धिच्छेद करो—
   नृपतिरपि । यदेव । इत्यादिश्य । श्रुत्वैतत् । वृक्षमेकमारुह्य । किमद्यापि । मन्त्रिणोक्तम् ।
३. काल, पुरुष, वचन देकर अर्थ लिखो—
   अचिन्तयत् । भवतु । भविष्यति । जीवसि । वर्तते ।
४. राजा शूरसेन अपने मन्त्री पर क्यों अप्रसन्न हो गया था ?

५. राजा ने क्यों अपने मन्त्री को कूप में फेंक दिया था? अन्त में उसे कैसे मालूम हुआ कि मेरा मन्त्री निरपराध है?
६. इस कथा से हमें क्या शिक्षा प्राप्त होती है?

लोकोक्तयः

१. शठे शाठ्यं समाचरेत् ।
२. संघे शक्तिः कलौ युगे ।
३. सन्ततिः शुद्धवंश्या हि परत्रेह च शर्म्मणे ।
४. पदं हि सर्वत्र गुणैर्निधीयते ।
५. रत्नाकरे युज्यत एव रत्नम् ।
६. रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ।
७. विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ।
८. मनोरथानामगतिर्न विद्यते ।
९. इष्टं धर्म्मेण योजयेत् ।
१०. कोऽर्थी गतो गौरवम् ?
११. भिन्नरुचिर्हि लोकः ।
१२. अङ्गीकृतं सुकृतिनः परिपालयन्ति ।
१३. महान् महत्येव करोति विक्रमम् ।
१४. निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ।

१५. शरीरमाद्यं खलु धर्म्मसाधनम् ।
१६. छिद्रेष्वनर्था बहुलीभवन्ति ।
१७. न रत्नमन्विष्यति मृग्यते हि तत् ।
१८. सत्यमेव विजयते नानृतम् ।
१९. महीयांसः प्रकृत्या मितभाषिणः ।
२०. अनुक्तमप्यूहति पण्डितो जनः ।
२१. अति सर्वत्र वर्जयेत् ।
२२. हितं मनोहारि च दुर्लभं वचः ।
२३. कृशे कस्यास्ति सौहृदम् ?
२४. न धर्म्मवृद्धेषु वयः समीक्ष्यते ।
२५. विना पुरुषकारेण दैवमत्र न सिध्यति ।

अभ्यास

१. सन्धिच्छेद करो—
परत्रेह । कोऽर्थी । एरण्डोऽपि । अनुक्तमप्यूहति । सत्यमेव ।
२. काल, पुरुष, वचन दो—
समाचरेत् । विद्यते । योजयेत् । सिध्यति । परिपालयन्ति ।
३. लिङ्ग, विभक्ति, वचन लिखो—
कलौ । धर्म्मेण । छिद्रेषु । प्रकृत्या । पुरुषकारेण । महीयांसः ।

शब्दार्थ

पृष्ठ १ रामायणसारः (१)

हत्वा—मार कर

अनुकीर्तनम्—वर्णन

मुनिपुङ्गवम्—मुनिश्रेष्ठ को

अनसूयकः—असूया (दोष-दृष्टि) से रहित

बिभ्यति—डरते हैं

संयुगे—युद्ध में

विपुलांसः—जिसके कन्धे विशाल हैं।

कम्बुग्रीवः—कम्बु (शंख) के समान ग्रीवा वाला

आजानुबाहुः—घुटनों तक लम्बी भुजाओं वाला

रिपुनिषूदनः—शत्रु-नाश-कर्ता

गाम्भीर्य्ये—गम्भीरता में

धनदेन—धन देने वाले (कुबेर) से

पृष्ठ ४ रामायणसारः (२)

प्रकृतीनाम्—प्रजाओं के

सम्भारान्—सामग्रियों को

विवासनम्—वनवास को

संयतः—बँधा हुआ

जगाम—गया।

अनुजगाम—पीछे गया।

दयिता—प्यारी

अनुगतः—अनुसरण किया गया।

व्यसर्जयत्—छोड़ दिया

वि उपसर्ग-पूर्वक णिजन्त सृज् धातु का लङ् प्रथमपुरुष एकवचन का रूप है।

बहूदका—अत्यधिक जल वाली

तीर्त्वा—तैर कर

तॄ धातु का क्त्वान्त रूप है।

आवासम्—निवास

संकाशः—तुल्य (बराबर)

निवर्तयामास—लौटा दिया।

राजीवलोचनः—कमल के समान नेत्रों वाला

शरासनम्—धनुष को

तूणौ—दो तूणीर

पृष्ठ ७ रामायणसारः (३)

संयति—युद्ध में

अग्निकल्पानाम्—अग्नि के समान (कान्ति वालों का)

विरूपिता–कुरूप बना दी
कामरूपिणी–स्वेच्छानुसार रूप धारण कर लेने वाली
विजघान–मार दिया
ज्ञातिवधम्–बन्धुओं (सजातियों) के मरण को
मैथिलीम्–मिथिला के स्वामी (जनक) की पुत्री को
मार्गमाणः–खोज करता हुआ
श्रमणाम्–संन्यास धारण की हुई स्त्री को
सम्यक्–ठीक प्रकार से
प्रत्ययार्थम्–विश्वास के लिए (परीक्षण के लिए)
हेम-पिङ्गलः–सुवर्ण के समान पिङ्गल वर्ण वाला
आहवे–युद्ध में

पृष्ठ ११ रामायणसारः (४)

वानरर्षभः–वानरों में श्रेष्ठ
दिदृक्षुः–देखने की इच्छा वाला
अभिज्ञानम्–स्मृति-चिन्ह
निष्पिष्य–कुचल कर (पीस कर)
पैतामहाद् वरात्–ब्रह्मा से प्राप्त वर से
सीताम् ऋते–सीता के बगैर 'ऋते' अव्यय के योग के कारण षष्ठी के स्थान में द्वितीया विभक्ति भी होती है
आदित्यसन्निभैः–सूर्य्य के समान
विगतकल्मषाम्–पाप से रहित को
प्रमुमोद–प्रसन्न हो गया

पृष्ठ १३ रामायणसारः (५)

आख्यायिकाम्–कथा को
समारुह्य–चढ़ कर
हित्वा–छोड़ कर
निरामयः–रोगरहित
क्षुद्भयम्–भूख का भय
कृतयुगे–सतयुग में
असंख्येयम्–संख्या-रहित (अत्यधिक)
प्रेत्य–मर कर
ईयात्—प्राप्त कर ले

पृष्ठ १५ श्रीकृष्णः

नृशंसः–दया-रहित (कठोर)
कारागारे–बन्धनगृह में (कैद में)
घनश्यामः–मेघ जैसा श्याम
नीलोत्पलाभः–नील कमल के समान
नैर्घृण्यम्–निर्दयता को

निर्धारितम्—निश्चित किया
शूर्पे—छाज में
विवृतानि—खुले हुए
कच्छम्—तीर को
जलौघः—जल-समूह
इत्थंकारम्—इस प्रकार
बालानुरूपाभिः—बालकों के अनुरूप (सदृश)
दशवर्षदेशीयः—दश वर्ष के लगभग आयु का

पृष्ठ १८ गीतोपदेशः

क्लैव्यम्—नपुंसकपन (कायरता) को
कौमारम्—बचपन
विहाय—छोड़ कर
संयाति—धारण कर लेता है
लोकसंग्रहम्—संसार की मर्यादा को
अनुवर्तते—अनुसरण करता है
दुष्कृताम्—पापियों के (बुरे आचरण करने वालों के)
एष्यसि—पा लेगा
आधत्स्व—लगा दे
देहभृता—शरीर धारण करने वाले (प्राणी) से

प्रतिजाने—मैं प्रतिज्ञा करता हूँ, प्रति उपसर्ग-पूर्वक ज्ञा धातु का लट् उत्तमपुरुष एकवचन में रूप है
भूतिः—ऐश्वर्य

पृष्ठ २२ युधिष्ठिरस्य कर्त्तव्य-परायणता

युधिष्ठिरस्य कर्तव्यपरायणता-युधिष्ठिर का कार्य में संलग्न होना
पाठितः—पढ़ाया गया
भृशम्—अत्यधिक
सपदि—शीघ्र
ज्ञातुम्—जानने को, ज्ञा धातु से तुमुन्नन्त रूप
सम्यक्तया—ठीक रूप से
उत्तरितुम्—उत्तर देने के लिए
अदूयत—कंपा दिया
अन्तराले—मध्य में (बीच में)
उत्सृष्टः—छोड़ दिया
प्रामोदत—प्रसन्न हो गया
अनुत्तीर्णम्—असफल
ह्यस्तनः—गत दिन (कल) का
आकर्ण्य—सुनकर

पृष्ठ २४ ध्रुवचारितम्

आरोप्य—बिठा कर

ईर्ष्यासहितम्—ईर्ष्या के साथ
आराध्य—आराधना कर
सपत्न्याः—सौतेली माता के
उत्सङ्गे—गोद में
दुःखच्छिदम्—दुःख दूर करने वाले को
निर्जगाम—चला गया
ध्रुवचिकीर्षितम्—ध्रुव की इच्छा को
स्पृष्ट्वा—छूकर, स्पृश् धातु का क्त्वान्त रूप है
ईश्वरानुकूल्यं विना—ईश्वर की अनुकूलता के बगैर, विना अव्यय के योग में द्वितीया विभक्ति
एवं कृते—ऐसा करने पर
पर्य्यटसि—भ्रमण करते हो
उपविश्य—बैठ कर
दृग्भ्याम्—नेत्रों से
अन्तःकरणे—हृदय में (मन में)

पृष्ठ २८ सुभाषितप्रशंसा

गीर्वाणभारती—देववाणी (संस्कृत)
पाषाणखण्डेषु—पत्थरों के टुकड़ों में
अवसीदति—दुःखी होता है
म्लानमुखी—मुरझाये हुए मुख वाली
भीता—डरी हुई
दिवम्—स्वर्ग को

पृष्ठ २९ विद्याप्रशंसा

पात्रताम्—योग्यता को
आप्नोति—प्राप्त होता है
किंशुकाः—पलास के पुष्प
नियुङ्क्ते—नियुक्त करती है, लगाती है
अपनीय—दूर करके
वितनोति—फैलाती है
साधयति—सिद्ध करवाती है

पृष्ठ ३० विद्याभ्यासः

धनानपेक्षया—धन की अपेक्षा के बिना
अध्यापयामासुः—पढ़ाते थे
समावर्तमानम्—लौटाते हुए को
अनवद्यानि—दोष रहित
निरङ्कुशम्—बे-रोक-टोक
बोधयति—बतलाती है, समझाती है
प्रवक्तारः—व्याख्याता
अतिमात्रम्—अत्यधिक

पृष्ठ ३१ विधिसृष्टपदार्थ-विचारः

सप्रयोजनम्—प्रयोजन के साथ

ऊर्णनाभाः—मकड़ियाँ
श्रान्तः—थका हुआ
प्रबुद्धः—जाग पड़ा
पलाय्य—भाग कर
निलीय—छिप कर
आकुलम्—बिखरा हुआ
पूर्वेद्युः—गत दिन, पिछले दिन
ब्रह्मसृष्टेषु—ब्रह्मा से रचे गये
वस्तुषु—पदार्थों में
विफलम्—व्यर्थ

पृष्ठ ३३ भोजकुमारस्य राज्यप्राप्तिः

पञ्चहायनः—पांच वर्ष का
आहूय—बुलाकर
आलोक्य—देख कर
निरीक्ष्य—देखकर
नियोजयामास—नियुक्त कर दिया
उपविष्टः—बैठ गया
विरञ्चिः—ब्रह्मा
विच्छायवदनः—मुरझाए हुए (शोभाहीन) मुखवाला
मृतकल्पः—मरा हुआ-सा, मृत-सदृश
प्रणिपत्य—नमस्कार करके
परिणतिः—परिणाम
विपाकः—परिणाम
पयोधयः—समुद्र
तूष्णीं बभूव—चुप हो गया
सम्प्रेष्य—भेज कर
प्राहिणोत्—भेजा
शोणितेक्षणः—खून-सी लाल आँखों वाला (क्रोधपूर्ण)
समेत्य—आकर
पिधाय—ढाँपकर (बंद कर)
प्रव्रजनम्—वनवास को
नियमनम्—बन्धन को
याताः—चले गए
वसुमती—धनयुक्त (पृथिवी)
करतलामलकवत्—हाथ की हथेली पर पड़े आमले की तरह
पुलिने—तीर पर

पृष्ठ ४२ शकुन्तलाम्प्रति कण्वोपदेशः

उत्कण्ठया—उत्सुकता से
अरण्यौकसः—वन में रहने वाले
बहुमता—आदर की गई
हुताग्नीन्—जिन्होंने अग्नि में हवन किया है।
पावयन्तु—पवित्र करें

अनुज्ञायताम्–आज्ञा दें
परित्यक्तनर्तना:–जिन्होंने नृत्य को छोड़ दिया है
अङ्कात्–गोद से
तनयम्–पुत्र को
अर्कम्–सूर्य को
प्रसूय–उत्पन्न करके
आश्लिष्य–आलिङ्गन करके
अतिमात्रम्–अत्यधिक
सहयायिन:–साथ जाने वाले, साथी
सविमर्शम्–विचारपूर्वक
सम्प्रेष्य–भेजकर
विसृज्य–छोड़कर, भिजवा कर
प्रत्यर्पितन्यास:–जिसने न्यास (अमानत) को अर्पण (वापिस) कर दिया है।

पृष्ठ ४८ अध्येतारो बाला:

अध्येतार:–पढ़ने वाले
चरमे यामे–अन्तिम प्रहर में
प्रबुध्यन्ते–जागते हैं
अधीतान्–पढ़े हुए पाठों को
असकृत्–कई बार
प्राक्–पहले
शीतालव:–शीत अनुभव करने वाले
उष्णोदकेन–गरम जल से
सौकर्य्याभावे–सुगमता न होने पर
आर्द्र वस्त्रेण–गीले कपड़े से
पुण्ड्रम्–तिलक को
धृत्वा–धारण कर
धृ धातु से क्त्वान्त रूप
उपनीता:–जिन्होंने यज्ञोपवीत धारण किया हुआ है
कन्दुकादिक्रीडया–गेंद वगैरा के खेल से
आदशमहोरम्–दस बजे तक
परिशीलयन्ति–अभ्यास करते हैं।
ईषत्करेषु–थोड़े समय में होने वाले
आसन्नायाम्–समीप आने पर
इतरभाषाध्यायिन:–दूसरी भाषाएँ पढ़ने वाले
क्षोदक्षमान्–विचार के योग्य
उपन्यस्यन्ति–प्रस्तुत करते हैं

पृष्ठ ४९ वणिक्पुत्र-कथा

अधिष्ठाने–स्थान में

देशान्तरगमनमना—दूसरे देश को जाने की इच्छा वाला
भुक्त्वा—भोग कर
भुज् धातु का क्त्वान्त रूप है
स्ववीर्य्यतः—अपने बल से
पुरुषाधमः—पुरुषों में नीच
तुला—तकड़ी, तराज़ू
वणिजः—व्यापारी के (बनिए के)
निक्षेपभूताम्—अमानत के तौर पर रखी हुई को
प्रस्थितः—चल पड़ा
ईदृक्—ऐसा
आत्मीयम्—अपने
शिशुम्—बालक को.
स्नानोपकरणहस्तं—जिस के हाथ में स्नान की सामग्री हो
बृहच्छिलया—बड़ी शिला से
श्येनेन—बाज़ से
विवदमानौ—विवाद करते हुए
तारस्वरेण—ऊँची आवाज़ से
अभिहितम्—कहा है
आदितः—आरम्भ से
सम्बोध्य—समझा कर (कह सुनकर)
सन्तोषितौ—प्रसन्न कर दिए

पृष्ठ ५२ हितोपदेशस्यारम्भः

गुणोपेतः—गुणों से युक्त
संशयोच्छेदि—संशयों को काटने वाला
अनधिगतशास्त्राणाम्—जिन्होंने शास्त्र न पढ़े हुए हों
काञ्चनसंसर्गात्—सुवर्ण के संग से
धत्ते—धारण करता है
द्युतिम्—शोभा को
मानपुरस्सरं—मानपूर्वक
कलहेन—विवाद से

पृष्ठ ५५ मित्रलाभस्य संक्षेपः

आगत्य—आकर
विकीर्य्य—बखेर कर
वियति—आकाश में
सुशासिता—शिक्षित
उक्तम्—कहा हुआ
एकचित्तीभूय—एक मन होकर
संहताः—मिले हुए
प्रत्यभिज्ञाय—पहिचान कर
उत्सृजेत्—छोड़ दे
बहिः+निसृत्य—बाहर निकलकर
असमीक्ष्य—न देखकर

उत्प्लुत्य–उछल कर
परिव्राजकः–संन्यासी
खनित्वा–खोद कर
अवस्थानम्–ठहरना
अतीवगर्हितम्–अत्यधिक निन्दित
परपिण्डेन–दूसरे के अन्न से
अवस्थोचित–अवस्था के योग्य
कार्य्यपरिच्छदः–कार्य्य का चुनाव
अतिक्रान्तोपवर्णनेन–हो चुकी बात के वर्णन करने से
उड्डीय–उड़कर
स्वगृहनिर्विशेषम्–अपने घर की तरह
मोचयितुं–छुड़ाने के लिए
कर्तरिकाम्–छुरी को
प्रत्यावृत्य–लौटकर
विमुक्तापदः–जिन के सङ्कट दूर हो गये हैं

पृष्ठ ७१ सत्सङ्ग-महिमा

सुमनःसङ्गात्–पुष्प के संग से
आरोहति–चढ़ जाता है
सुप्रतिष्ठितः–ठीक तरह से प्रतिष्ठित किया हुआ
सत्सन्निधानेन–उत्तम सङ्गति से
समागमात्–मेल से
विशिष्टैः–उत्तमों से

पृष्ठ ७२ उद्योगप्रशंसा

आदत्ते–ग्रहण करता है
उपैति–प्राप्त होता है
निहत्य–दूर करके
आत्मशक्त्या–अपनी शक्ति से

पृष्ठ ७३ सूक्तयः

आस्वाद्यतोयाः–मधुर जल वाली
आसाद्य–पाकर
अपेयाः–पीने के अयोग्य
अष्टविधः–आठ प्रकार का
दातव्यम्–देने के योग्य, दा धातु का तव्यप्रत्ययान्त रूप है
क्षणविध्वंसि–क्षण में नाश हो जाने वाला
निधने+अपि–मरने पर भी
परिहर्तव्यः–छोड़ने के योग्य
अलङ्कृतः+अपि–सजा हुआ भी
कुसुमस्तवकस्य–पुष्पों के गुच्छे की
वृत्ती–स्वभाव (अवस्थाएँ)

पृष्ठ ७५ सुमति-सुचिव-कथा

सुतनिर्विशेषम्–पुत्र की तरह

प्रकृतीः—प्रजा को
अत्यर्थम्—अत्यधिक
नक्तन्दिनम्—रात-दिन
विकलयितुम्—व्याकुल करने को
वीतधैर्य्यम्—धैर्य्य से रहित
स्फोटकः—फोड़ा
मृगयायै—शिकार के लिए
निविडकाननाभ्यन्तरम्—घने वन के मध्य में
आरात्—समीप
नततुण्डः—नीचे मुख किए हुए
झटिति—शीघ्र
काश्यपेयः—(कश्यप ऋषि की संतान) सूर्य्य
स्वीयमयूखान्—अपनी किरणों को
तमोवसनम्—अन्धकाररूपी वस्त्र को
पिनह्य—पहिन कर
श्वापदाः—हिंसक जन्तु
निशीथसमयः—अर्ध रात्रि का समय
अतर्कितः—अचानक
वृक्षाभ्याशम्—वृक्ष के समीप
संज्ञाहीन इव—बेहोश-सा
समीरणैः—पवनों से
समन्ततः—चारों ओर से
आदिदेश—आज्ञा दी
प्रतिवचनम्—उत्तर
विहस्य—हँसकर
प्रोवाच—बोला

पृष्ठ ८२ लोकोक्तयः

संघे—मेल में
शर्म्मणे—कल्याण के लिए
रत्नाकरे—रत्नों की खान (समुद्र) में
निरस्तपादपे—वृक्षों से रहित
आद्याम्—प्रथम (मुख्य)
छिद्रेषु—दुःखों में, छेदों में
अनुक्तम्—न कही हुई बात को
कृशे—निर्बल (दुर्बल) में

प्रथम आदर्श प्रश्न-पत्र

१. अधोनिर्दिष्ट में से केवल ३ भागों का अर्थ लिखो—

(क) अस्य शिशोः रूपं नितान्तं विलक्षणमासीत् । वर्णो घनश्यामः । किसलय-पेलवान्यङ्गानि । मुखं नीलोत्पलाभम् । ईदृक्स्वरूपं शिशुं दृष्ट्वा दम्पती परं विस्मयं प्राप्नुताम् । परं परस्मिन्नेव क्षणे कंसस्य नैघृण्यं स्मृत्वा तौ चिन्तातुरावभवताम् ।

(ख) अन्येद्युः पाठस्योपक्रमे आचार्य्येण युधिष्ठिरः कथितः— अङ्ग ! कथयाधुना; केन कारणेन त्वया ह्योऽन्तराल एव पाठ उत्सृष्टः । किमिति च परीक्षायामनुत्तीर्ण इति ।

(ग) ध्रुवः प्राह—"हे महर्षे ! भवता सुखदुःखसमचित्तानां पुंसामयं मार्गो दर्शितः परं स सुरुच्या दुर्वचनबाणैर्भिन्ने मम हृदि न तिष्ठति । अन्यैरसम्पादितं सर्वोत्कृष्टं स्थानमिच्छतो ममोपायं ब्रूहि । भवान् पर्य्यटति लोकहितार्थं सूर्य्यवत् ।" इति ।

(घ) अथासौ वणिक्-शिशुः स्नानोपकरणमादाय प्रहृष्टस्तेनाभ्यागतेन सह प्रस्थितः । तथानुष्ठिते स वणिक् स्नात्वा तं शिशुं नदीगुहायां प्रक्षिप्य तद्द्वारं बृहच्छिलयाऽऽच्छाद्य सत्वरं गृहमागतः । पृष्टश्च तेन वणिजा—भो अभ्यागत ! कथ्यतां कुत्र मे शिशुर्यस्त्वया सह नदीं गतः ? १५

२. अधोलिखित पद्यों में केवल चार के अर्थ लिखो—

(क) माता शत्रुः पिता वैरी, येन बालो न पाठितः ।
न शोभते सभामध्ये, हंसमध्ये बको यथा ॥

(ख) दुर्जनः परिहर्तव्यो विद्ययाऽलंकृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयंकरः ॥

(ग) मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यं ते, प्रतिजाने प्रियोऽसि मे ॥

(घ) रूप-यौवनसम्पन्ना विशालकुलसम्भवाः।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥

(ङ) यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्।
एवं पुरुषकारेण विना दैवं न सिध्यति ॥ १०

३. अधोलिखित कथाओं में से केवल एक का सार अपने शब्दों में लिखो—

(क) वणिक्पुत्रकथा

(ख) ध्रुवचरितम्

(ग) भोजकुमारस्य राज्यप्राप्तिः। १०

४. अधोनिर्दिष्ट में से केवल पाँच के लिङ्ग, विभक्ति, वचन लिखो—

माम्। राजानम्। सभायाम्। रथात्। वचः। सः। भोजस्य। ५

५. संस्कृत में अनुवाद करो—

(क) प्राचीन काल में छात्र गुरुकुलों में पढ़ते थे।

(ख) विद्या विनय को देती है, और विनय योग्यता को देता है।

(ग) शिष्य गुरु के लिए कूप से जल लाता है।

(घ) जनक ने सीता का विवाह राम से किया। १०

द्वितीय आदर्श प्रश्न-पत्र

१. अधोनिर्दिष्ट का सरल हिन्दी में अर्थ लिखो—

(क) कोऽपि भूपो विधिसृष्टानां पदार्थानां प्रयोजनविचारे

कुतूहलयुक्तोऽभवत् । सः चिरकालं विचारेण सर्वं वस्तु सप्रयोजनमेवापश्यत् । परं मक्षिकाः ऊर्णनाभाश्च कस्मै प्रयोजनाय सृष्टाः ? इति चिरं विचारयन्नपि न ज्ञातुं शक्तः ।

(ख) न केवलं पुरुषाः स्त्रियोऽपि पुरा विद्यां निरंकुशं अभ्यस्यन्ति स्म । ताः किल ब्रह्मविद्यायामपि निपुणा बभूवुरिति उपनिषद् अस्मान् बोधयति ।

(ग) प्रबुद्धतराः कुमाराः अनध्यायेषु स्थिरमस्थिरं वा समाजं मेलयित्वा तत्र क्षोदक्षमान् विषयान् उपन्यस्यन्ति । अपि च मातृपितृभ्यां गृहे बालास्तथा परिशील्यन्ते यथा तेषां ईश्वरे भक्तिः श्रद्धा च जायेत । १५

२. केवल चार पद्यों का अर्थ लिखो—

(क) कर्म्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्म्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्म्मणि ॥

(ख) कुसुमस्तवकस्येव द्वे वृत्ती तु मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य विशीर्य्येत वनेऽथवा ॥

(ग) काव्यशास्त्रविनोदेन, कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणाम्, निद्रया कलहेन वा ॥

(घ) अल्पानामपि वस्तूनां, संहतिः कार्य्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥

(ङ) यस्य मित्रेण संलापः, यस्य मित्रेण संस्थितिः ।
यस्य मित्रेण संभाषा, ततो नास्तीह पुण्यवान् ॥ १०

३. अधोलिखित में से केवल एक का सार अपने शब्दों में लिखो—

(क) युधिष्ठिरस्य कर्त्तव्यपरायणता

(ख) सुमतिसचिवकथा

(ग) विधिसृष्ट-पदार्थविचार: १०

४. अधोनिर्दिष्ट में से केवल पाँच का पद-परिचय दो—

कर्म्मणि। अभवत्। बोधयति। मेलयित्वा। ज्ञातुम्। कस्मै। बध्यन्ते। ५

५. संस्कृत में अनुवाद करो—

(क) विद्वानों का कथन है कि ईश्वर सब जगह विद्यमान है।

(ख) शिक्षा ज्ञान के लिए होती है।

(ग) पहले इस देश में स्त्रियाँ भी पढ़ती थीं।

(घ) संसार में सच्चे मित्र थोड़े ही हैं। १०

व्याकरण

भाषा

जिस साधन के द्वारा हम अपने हृदय के भाव दूसरे के आगे प्रकट करें, उसे 'भाषा' कहते हैं।

व्याकरण

जिस शास्त्र के द्वारा भाषा की शुद्धि और अशुद्धि का पूर्ण ज्ञान हो, उसे 'व्याकरण' कहते हैं।

संस्कृत भाषा और उसकी लिपि

भारतवर्ष में संस्कृत जिस लिपि में लिखी जाती है, उसे नागरी या देवनागरी लिपि कहते हैं।

इस लिपि की वर्णमाला में दो प्रकार के वर्ण हैं—स्वर और व्यञ्जन।

स्वर

स्वर—जिनके उच्चारण में किसी दूसरे वर्ण की सहायता की आवश्यकता न हो। इनकी संख्या १३ है। इनके चार भेद हैं।

१ ह्रस्व—जिनके उच्चारण में अन्य स्वरों से थोड़ा समय लगे, यथा—अ, इ, उ, ऋ, ऌ।

२. दीर्घ—जिनके उच्चारण में ह्रस्व से दुगुना समय लगे, जैसे—आ, ई, ऊ, ॠ।

३ सन्धिस्वर—जो दो वर्णों के मेल से बनें, जैसे—ए, ऐ, ओ, औ।

४ प्लुतस्वर—जिनके उच्चारण में ह्रस्व से तिगुना समय लगे। इनके बोध के लिए स्वर के आगे तीन का अङ्क लिख देते हैं। जैसे—आ ३, ई ३, ओ३म्।

व्यंजन

व्यञ्जन—जिनका उच्चारण स्वर की सहायता के बिना व्यक्त न हो। ये संख्या में ३३ हैं।

कवर्ग	क्	ख्	ग्	घ्	ङ्
चवर्ग	च्	छ्	ज्	झ्	ञ्
टवर्ग	ट्	ठ्	ड्	ढ्	ण्
तवर्ग	त्	थ्	द्	ध्	न्
पवर्ग	प्	फ्	ब्	भ्	म्
अन्तःस्थ	य्	र्	ल्	व्	
ऊष्म	श्	ष्	स्	ह्	

संज्ञा-प्रकरण

व्याकरण के नियमों को समझने के लिए व्याकरण में आई हुई संज्ञाओं को समझना परमावश्यक है।

१ धातु—क्रियावाचक शब्दों को 'धातु' कहते हैं, यथा—भू, पच्, पठ् आदि।

२ क्रियापद—धातु के आगे 'ति' आदि प्रत्यय जोड़कर जिनका प्रयोग हो, उन्हें क्रियापद कहते हैं, यथा "भू" से "ति" प्रत्यय लगाने से 'भवति' क्रियापद बनता है।

३ उपसर्ग—क्रिया से पहले लगकर जो उसके अर्थ को बदल दें, यथा 'भवति'–होता है। 'अनु' लगने से 'अनुभवति'–अनुभव करता है।

४ प्रत्यय—धातु वा नाम से परे किसी विशेष अर्थ को प्रकट करने के लिए जो शब्द जोड़े जाते हैं, उन्हें प्रत्यय कहते हैं। ये प्रत्यय पाँच प्रकार के हैं।

(१) सुप् प्रत्यय, (२) तिङ् प्रत्यय, (३) कृत् प्रत्यय, (४) तद्धित प्रत्यय, (५) स्त्री प्रत्यय।

५ विभक्ति—धातु से परे ति, तः, अन्ति आदि।

नाम से परे स्, औ, अस् आदि

६ पद—विभक्ति युक्त शब्द को 'पद' कहते हैं, यथा–रामः, भवति आदि।

७ अव्यय—जो सभी विभक्तियों, लिङ्गों और वचनों में समान ही रहे।

८ गुण—ए, ओ, अर्, अल् को 'गुण' कहते हैं।

९ वृद्धि—ऐ, औ, आर्, आल् को 'वृद्धि' कहते हैं।

सन्धि

सन्धि शब्द का अर्थ है, मेल। वर्णों की अति समीपता होने पर उनके मेल से जो ध्वनि में विकार होता है, उसे 'सन्धि' कहते हैं।

यथा—विद्या + आलयः = विद्यालयः। जगत् + ईशः = जगदीशः। इसके तीन भेद हैं—१ स्वरसन्धि, २ व्यञ्जनसन्धि। ३ विसर्गसन्धि।

स्वर-सन्धि

स्वरों के योग से (एक स्वर से दूसरा स्वर परे होने पर) स्वर में जो विकार (परिवर्तन) होता है, उसे स्वरसन्धि कहते हैं।

स्वरसन्धि के निम्न सात भेद हैं:—

१ दीर्घ सन्धि

ह्रस्व अथवा दीर्घ अ, इ, उ, ऋ से परे ह्रस्व अथवा दीर्घ अपनी जाति का स्वर आजाय तो दोनों को मिलाकर दीर्घ हो जाता है।

यथा—अ + अ = आ—परम + अर्थः = परमार्थः। कथय + अधुना = कथयाधुना।

अ + आ = आ—पठित + आवृत्तिः = पठितावृत्तिः। शिव + आलयः = शिवालयः।

आ + अ = आ—माता + अरण्यम् = मातारण्यम्। सहसा + अन्यत्र = सहसान्यत्र।

अ + आ = आ—दया + आकरः = दयाकरः । लता + आलयः = लतालयः ।

इ + इ = ई—मुनि + इन्द्रः = मुनीन्द्रः । रवि + इन्द्रः = रवीन्द्रः ।

इ + ई = ई—कवि + ईशः = कवीशः । मुनि + ईश्वरः = मुनीश्वरः ।

ई + इ = ई—नदी + इरावती = नदीरावती ।

ई + ई = ई—नदी + ईशः = नदीशः । श्री + ईशः = श्रीशः ।

उ + उ = ऊ—साधु + उक्तम् = साधूक्तम् । भानु + उदयः = भानूदयः ।

उ + ऊ = ऊ—मञ्जु + ऊरीकृतम् = मञ्जूरीकृतम् । सिन्धु + ऊर्म्मिः = सिन्धूर्म्मिः ।

ऊ + उ = ऊ—वधू + उत्सवः = वधूत्सवः ।

ऊ + ऊ = ऊ—भू + ऊर्ध्वम् = भूर्ध्वम् ।

ऋ + ऋ = ॠ—पितृ + ऋणम् = पितॄणम् ।

२ गुण सन्धि

ह्रस्व "अ" अथवा दीर्घ "आ" से परे ह्रस्व वा दीर्घ इ, उ, ऋ आजाने से अ + इ = ए और अ + उ = ओ तथा अ + ऋ = अर् हो जाते हैं । इस सन्धि को गुणसन्धि कहते हैं ।

अ + इ = ए—नर + इन्द्रः = नरेन्द्रः । पुत्र + इत्थम् = पुत्रेत्थम् ।

अ + ई = ए—गण + ईशः = गणेशः । देव + ईशः = देवेशः ।

आ + इ = ए—यथा + इच्छम् = यथेच्छम् । लता + इव = लतेव ।

आ + ई = ए—रमा + ईशः = रमेशः । सीता + ईश्वरं = सीतेश्वरम् ।

अ + उ = ओ—वेद + उपनिषदम् = वेदोपनिषदम् । हित + उपदेशः = हितोपदेशः ।

अ + ऊ = ओ—एक + ऊनम् = एकोनम् । गृह + ऊर्ध्वं = गृहोर्ध्वम् ।

आ + उ = ओ—शकुन्तला + उदकेन = शकुन्तलोदकेन ।

आ + ऊ = ओ—गङ्गा + ऊर्म्मिः = गङ्गोर्म्मिः ।

अ + ऋ = अर्—तव + ऋद्धिः = तवर्द्धिः ।

३ वृद्धि सन्धि

ह्रस्व वा दीर्घ अकार से परे ए, ऐ और ओ, औ आ जाने से अ + ए = ऐ, अ + ऐ = ऐ, अ + ओ = औ, अ + औ = औ हो जाते हैं। इस सन्धि को वृद्धि सन्धि कहते हैं।

अ + ए = ऐ—एक + एकः = एकैकः। अद्य + एव = अद्यैव। न + एषा = नैषा।

अ + ऐ = ऐ—देव + ऐश्वर्य्यम् = देवैश्वर्य्यम्।

आ + ए = ऐ—सहसा + एव = सहसैव। सदा + एव = सदैव।

आ + ऐ = ऐ—विद्या + ऐश्वर्य्यम् = विद्यैश्वर्य्यम्।

अ + ओ = औ—मम + ओष्ठयोः = ममौष्ठयोः। शुद्ध + ओदनः = शुद्धौदनः।

अ + औ = औ—तव + औदार्य्यम् = तवौदार्य्यम्।

आ + ओ = औ—कदा + ओदनम् = कदौदनम्।

आ + औ = औ—महा + औषधम् = महौषधम्।

४ यण् सन्धि

ह्रस्व अथवा दीर्घ इ, उ और ऋ से परे यदि इनसे भिन्न कोई स्वर हो तो इ को य्, उ को व्, तथा ऋ को र् हो जाता है।

इ—असमानस्वर—यदि + अपि = यद्यपि।

इति + आह = इत्याह।

ई—असमानस्वर—नदी + उदकम् = नद्युदकम्।

नदी + अम्बु = नद्यम्बु।

उ—असमानस्वर—मधु + आनय = मध्वानय।

साधु + आदि = साध्वादि।

ऊ—भिन्नस्वर—सरयू + अम्बु = सरय्वम्बु।

ऋ—भिन्नस्वर—पितृ + आज्ञा = पित्राज्ञा।

भर्तृ + उपदेशः = भर्त्रुपदेशः।

५ अयादि सन्धि

ए, ऐ, ओ, औ से परे यदि कोई स्वर आ जाय तो क्रम से ए को अय्, ऐ को आय्, ओ को अव् और औ को आव् हो जाता है।

ए—स्वर = अय्— ने + अनम् = नयनम्।

ने + अति = नयति।

ऐ—स्वर = आय्—तस्मै + अन्नम् = तस्मायन्नम्।

नै + अकः = नायकः।

ओ—स्वर = अव् —भो + अति = भवति।

साधो + एतस्मै = साधवेतस्मै।

औ—स्वर = आव्—द्वौ + एव = द्वावेव।

तौ + उद्यानम् = तावुद्यानम्।

६ पूर्वरूप सन्धि

पद के अन्त के 'ए' अथवा 'ओ' से परे यदि ह्रस्व अ हो तो दोनों के स्थान में पूर्वरूप (पूर्व का ही रूप) अर्थात् 'अ' का लोप हो जाता है।

ते + अत्र = तेऽत्र। सर्वे + अपि = सर्वेऽपि।

७ पररूप सन्धि

ह्रस्व अकारान्त उपसर्ग से परे यदि ऐसी क्रिया हो, जिसके आदि में ए अथवा ओ हो तो वृद्धि नहीं होती। उपसर्ग का 'अ' ए, ओ में जाकर मिल जाता है। इसी को पररूप कहते हैं। यथा—उप + ओषति = उपोषति।

प्रकृतिभाव

उपर्युक्त नियमों के लागू होने पर भी सन्धि का न होना प्रकृतिभाव कहलाता है। प्रकृतिभाव का अर्थ है—कोई परिवर्तन न

होना। द्विवचन के दीर्घ ई, ऊ अथवा ए की अगले स्वर के साथ सन्धि नहीं होती।

यथा—कवी + अवर्णयताम्—इसमें ई को य् करके यण् सन्धि नहीं हुई।
गुरू + अपूजयताम्—इसमें भी ऊ को 'व्' नहीं हुआ।
फले + आनयामि—इसमें ए को अय् नहीं हुआ।

अभ्यास

सन्धिविच्छेद करो—

नास्ति। चोक्तम्। पाठोपक्रमे। तदाचार्य्यः। नैषा। अपरेणोक्तम्। एतान्यपि। अप्यनर्थाय। इत्युक्त्वा। अस्त्यनघः। प्रसीदत्वाचार्य्यः। इत्याकर्ण्य।

सन्धि करो—

आचार्य्येण + आदिष्टः। पठितस्य + आवृत्तिः। न + अपत्यम्। युधिष्ठिरस्य + एतत्। भूरि + अश्लाघत। मनु + आदि। महा + उपदेशकः। असौ + आदित्यः।

व्यञ्जन-सन्धि

स्वर अथवा व्यञ्जन परे होने पर व्यञ्जनों में जो विकार होता है, उसे व्यञ्जन-सन्धि कहते हैं। सन्धि होने पर जो विकार होता है, वह कहीं पूर्व वर्ण में होता है, कहीं पर-वर्ण में।

यथा—अप् + जम् = अब्जम्। छत्र + छाया = छत्रच्छाया।

(क) पदान्त क् च् ट् त् प् से परे यदि वर्ग का तृतीय चतुर्थ पञ्चम वर्ण, अन्तःस्थ, ह और स्वर वर्ण हो तो उसे अपने वर्ग का तीसरा वर्ण हो जाता है।

यथा—वाक् + ईशः = वागीशः। अच् + आदि = अजादि।

सम्राट् + इच्छति = सम्राडिच्छति। कश्चित् + अरण्ये = कश्चिदरण्ये।

अप् + जम् = अब्जम्।

(ख) वर्ग के प्रथम अक्षर (क् च् ट् त् प्) को अनुनासिक (ङ, ञ, ण, न, म) परे होने पर अपने वर्ग का पञ्चम अक्षर भी हो जाता है।

यथा—प्राक् + मनोहरः = प्राङ्मनोहरः। अच् + नास्ति = अञ्नास्ति। मधुलिट् + मत्तः = मधुलिण्मत्तः। जगत् + नाथः = जगन्नाथः। अप् + मयम् = अम्मयम्।

(ग) क् च् ट् त् प् से परे मय और मात्र हों तो प्रथम अक्षर को पाँचवाँ अक्षर अवश्य हो।

वाक् + मयम् = वाङ्मयम्। तत् + मात्रम् = तन्मात्रम्।

(घ) किसी वर्ग के दूसरे, तीसरे वा चौथे वर्ण से परे यदि अघोष (वर्गों के प्रथम, द्वितीय अक्षर श् ष् स्) वर्ण हो तो उसे उसी वर्ग का प्रथम वर्ण होता है।

यथा—सुहृद्+सु=सुहृत्सु। ककुभ्+सु=ककुप्सु।

(ङ) त् से परे यदि च् ट् ल् हों तो त् को भी क्रम से च् ट् ल् ही हो जाता है। यदि छ हो तो त् को च् ही होता है।

यथा—तत्+चक्रम्=तच्चक्रम्। भवत्+टीका=भवट्टीका।
तत्+लीनम्=तल्लीनम्। तत्+छत्रम्=तच्छत्रम्।

(च) सकार और तवर्ग का श् वा चवर्ग से योग हो तो स् को श् और तवर्ग को चवर्ग हो जाता है।

यथा—महत्+चक्रम्=महच्चक्रम्। तद्+जयः=तज्जयः।
बालस्+चिनोति=बालश्चिनोति।

(छ) सकार और तवर्ग का ष वा टवर्ग से योग हो तो 'स्' को 'ष्' और तवर्ग को टवर्ग होता है।

यथा—रामस्+टीकते=रामष्टीकते। इष्+तम्=इष्टम्।
उद्+डीयते=उड्डीयते। तद्+डिण्डिमः=तड्डिण्डिमः।

(ज) यदि तवर्ग से परे "श" आ जाय तो "श" "छ" में बदल जाता है।

यथा—तत्+श्रुत्वा=तच्श्रुत्वा, तच्छ्रुत्वा।

(झ) यदि किसी वर्ग के पहले वा तीसरे पदान्त वर्ण से परे 'ह' हो तो ह् के स्थान में उसी वर्ग का चौथा वर्ण विकल्प से होता है। पहले को (क) भाग के नियमानुसार तीसरा होगा ही।

यथा—वाक्+हरिः=वाग्हरिः, वा वाग्घरिः। तत्+हितम्=तद्+हितम्, तद्धितम्। तत्+हानिः=तद्हानिः, तद्धानिः। अप्+हारः=अब्हारः, अब्भारः।

(ञ) पदान्त न् से परे यदि तवर्ग, टवर्ग और चवर्ग के प्रथम और द्वितीय वर्ण परे हों तो न् को अनुस्वार और स् हो जाता है।

यथा—कस्मिन्+चित्=कस्मिंश्चित्। चौरान्+ताडयन्ति=

चौरांस्ताडयन्ति ।

(ट) ह्रस्व स्वर से परे यदि 'ङ्, ण्, न्' हों, और पीछे कोई स्वर हो तो ङ्, ण्, न् को द्वित्व हो जाता है।

यथा—प्रत्यङ्+आत्मा—प्रत्यङ्ङात्मा । सुगण्+ईशः—सुगण्णीशः । कस्मिन्+इति—कस्मिन्निति ।

(ठ) यदि 'र्' से परे र हो तो पहले र् का लोप हो जाता है, और र् के पूर्वस्थित स्वर को दीर्घ हो जाता है।

यथा—निर्+रोगः—नीरोगः । पुनर्+रमते—पुनारमते ।

(ड) पदान्त म् के परे यदि स्वर हो तो म् स्वर में मिल जाता है, यदि परे व्यञ्जन हो तो म् को अनुस्वार, अथवा जिस वर्ग का अक्षर परे हो, उसी वर्ग का पञ्चम अक्षर हो जाता है।

यथा—किम्+इति—किमिति । किम्+करोति—किङ्करोति, किं करोति ।

अभ्यास

सन्धिच्छेद करो—

कथमपि । तदाकर्ण्य । विचारयन्नपि । त्यजेदुद्योगम् । प्रभातमासीत् । द्रोणाद्धर्मशास्त्रम् । एतच्चिन्तयित्वा । कश्चिद्दूर्णनाभः ।

सन्धि करो—

प्रमाणम्+इति । कदाचित्+महति । क्वचित्+अरण्ये । तत्+एतेषाम् । देशात्+आगत्य । जगत्+नाथः । वाक्+हरिः । उद्+लङ्घते ।

—:*:—

विसर्ग-सन्धि

विसर्ग के परे स्वर या व्यञ्जन होने पर विसर्ग को जो विकार होता है, उसे विसर्ग-सन्धि कहते हैं। यथा—देवः+अवदत् = देवोऽवदत्।

विसर्ग को उ

(क) विसर्ग से पूर्व यदि ह्रस्व 'अ' हो, और परे ह्रस्व 'अ' अथवा हश् (वर्ग का ३ य, ४र्थ, ५म तथा य्, र्, ल्, व्, ह्) वर्णों में से कोई हो तो विसर्ग को 'उ' हो जाता है। यह 'उ' पूर्व 'अ' से मिलकर 'ओ' गुण हो जाता है। और पिछले 'अ' के स्थान पर ऽ—ऐसा चिह्न रह जाता है।

यथा—कः + अपि = कोऽपि। कुतः + अत्र = कुतोऽत्र।

विसर्ग का लोप

(ख) १ विसर्ग से पूर्व ह्रस्व अकार हो और पीछे ह्रस्व 'अ' के बिना कोई स्वर हो तो विसर्ग का लोप हो जाता है।

यथा—कर्तव्यः + इति = कर्तव्य इति। चित्रग्रीवः + उवाच = चित्रग्रीव उवाच।

२ यदि विसर्ग से पूर्व दीर्घ आ हो और पीछे कोई स्वर या कोई हश् वर्ण हो तो भी विसर्ग का लोप होता है।

यथा—राजपुत्राः + ऊचुः = राजपुत्रा ऊचुः। अनर्थाः + बहुलीभवन्ति = अनर्था बहुलीभवन्ति।

विसर्ग को र्

(ग) यदि विसर्ग से पूर्व अ और आ से भिन्न कोई अन्य स्वर अथवा हश् में से कोई अक्षर हो तो विसर्ग को र् हो जाता है।

यथा—तयोः+एकः = तयोरेकः। बृहस्पतिः + इव = बृहस्पतिरिव।

विसर्ग को श्, ष्, स्,

(घ) विसर्ग के पीछे च्, छ् हो तो विसर्ग को श्; विसर्ग के पीछे ट्, ठ् हो तो विसर्ग को ष् और त, थ् हो तो विसर्ग को स् हो जाता है।

एकः+चन्द्रः=एकश्चन्द्रः । भीतः+टलति=भीतष्टलति । शिक्षिताः + ते = शिक्षितास्ते ।

(ङ) यदि विसर्ग से पीछे श्, ष्, स् हो तो विसर्ग को क्रम से श्, ष्, स् हो जाते हैं, अथवा विसर्ग ही रह जाते हैं।

यथा—देवः+शेते = देवश्शेते, देवः शेते । दिवसः+षष्ठः = दिवसष्षष्ठः, दिवसः षष्ठः ।

विचित्रः + संसारः = विचित्रस्संसारः, विचित्रः संसारः ।

षत्व-विधिः

(च) अ, आ से भिन्न स्वर, य्, र्, ल्, व् और कवर्ग से परे प्रत्यय-सम्बन्धी स् को ष् हो जाता है।

यथा—गो+सु, गोषु । नरे+सु = नरेषु ।

णत्व-विधिः

